ISSN- 2583-5629

# दीपशिखा

रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृत-दर्शन-विभागस्य ई-पत्रिका

अष्टमः अङ्कः
(जनवरी, २०२५)



## स्वामिविवेकानन्द-स्वामिब्रह्मानन्द-स्मृतिमन्दिर-शताब्दी-संस्मरण-विशेषाङ्कः

ISSN– 2583-5629

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृतदर्शनविभागस्य षाण्मासिकी ई-पत्रिका)

अष्टमः अङ्कः
(१२ जनवरी, २०२५)

उपदेष्टा

स्वामी आत्मप्रियानन्दः

मुख्यसम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलुडमठः, हावडा, पश्चिमवङ्गः ७११२०२

प्रबन्धनसम्पादकः

स्वामी जपसिद्धानन्दः

सम्पादकमण्डली

डॉ. गोपीकृष्णन् रघुः
डॉ. नीरजकुमारभार्गवः
डॉ. शन्तनुः अयाचितः
डॉ. सुखदेवभट्टः

सम्पादनसहायकः

शान्तनुनायेकः
शुभदीपदासः

# सूची


| क्रमः | प्रबन्धः (पठितुं शीर्षकं नुदतु) | लेखकः | पुटसङ्ख्या |
| --- | --- | --- | --- |
| १. | निवेदनम् | निवेदकः | १ |
| २. | सम्पादकीयम् | सम्पादकाः | ३ |
| ३. | विवेकानन्दस्वामिनां नारीकल्याणचिन्ता | उत्तमघोषः | ६ |
| ४. | प्रभोः मानससुत जय श्रीराखाल | प्रलयनन्दी | ११ |
| ५. | महामानवरूपिशिवस्य स्मृतिमन्दिरसन्दर्भे | श्रीव्यासदेवमाजी | १९ |
| ६. | विवेकानन्दस्वामिपादानां स्मृतिमन्दिरस्य स्थापत्यम् | शुभदीपदासः | २६ |
| ७. | ब्रह्मानन्दस्वामिनः स्मृतिमन्दिरम् | राजेश-अधिकारी | २९ |
| ८. | श्रीरामकृष्णमानसपुत्रस्य स्मृतिमन्दिरसन्दर्भे | विश्वरूपवेजः | ३५ |
| ९. | वैवस्वतनचिकेतसोः संवादः | ब्रह्मचारिणः जितेनरमेनप्रह्लादाः | ४३ |
| १०. | भारते शक्तिपूजा | आविरलाल-गङ्गोपाध्यायः | ४९ |
| ११. | विवेकस्तुतिः | सुमन्तपात्रः | ६० |
| १२. | मानवतायाः प्रस्फुटितं शतदलम् | अनुवादकः– स्वामी वेदार्थानन्दः | ६२ |

| | | | |
|---|---|---|---|
| १३. | ब्रह्मानन्दषट्कम् | डॉ. गोपीकृष्णन्-रघुः | ८५ |
| १४. | सद्गुरुः स्वामी ब्रह्मानन्दः | ब्रह्मचारी ईशानचैतन्यः | ८७ |
| १५. | स्वामिविवेकानन्दस्य मंदिरस्थापनाय आह्वानम् | अनुवादकः– शाश्वत-झा | ९३ |
| १६. | स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम् (अंशविशेषस्य अनुवादः) | अनुवादकः– ब्रह्मचारी अच्युतचैतन्यः | ९६ |
| १७. | स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः (अंशविशेषस्य अनुवादः) | डॉ. राकेशदाशः, शान्तनुनायेकः (अनुवादकौ) | १०० |




RAMAKRISHNA MISSION VIVEKANANDA
EDUCATIONAL AND RESEARCH INSTITUTE
(Deemed to be University)
as declared by Government of India under Section 3 of UGC Act, 1956
P.O. Belur Math, Dist. Howrah 711202, West Bengal, India

# निवेदनम्

(स्वामिविवेकानन्द-स्वामिब्रह्मानन्द-स्मृतिमन्दिरस्य शतवर्षम् उपलक्ष्य दीपशिखायाः विशेषसंख्या)

अथेदानीं सप्रश्रयं सामोदं च विद्वज्जनसमक्षमिदं विनिवेदयामो यत् स्वामिविवेकानन्द-स्वामिब्रह्मानन्द-महाराजानां स्मृतिमन्दिरस्य शतवर्षम् उपलक्ष्य रामकृष्णसङ्घः विविधेषु शाखाकेन्द्रेषु, विशेषतः बेलुडमठे मूलकेन्द्रे पूजा-होम-पारायण-पुस्तकप्रणयनादिषु कार्यक्रमेषु आत्मानं नियोजयन् उभयोः श्रीरामकृष्णपार्षदयोः संस्मरणं कुर्वन् वर्तते। पुण्यक्षेत्रे बेलुडमठे स्वामिविवेकानन्दमहाराजस्य नामाङ्किते विश्वविद्यालये संस्कृतदर्शनविभागः पञ्चदशवर्षाणि यावत् सुरभारत्याः सेवायां रतः संस्कृतभाषायाः भारतीयसंस्कृतेः च प्रचारं प्रसारञ्च कुर्वन् वर्तते। तत्र विभागेऽस्मिन् दीपशिखानाम्नी काचन वैद्युतिन-पत्रिका (E-Magazine) प्रकाश्यते। तस्याः इयं सङ्ख्या एषां स्वामिविवेकानन्द-स्वामिब्रह्मानन्द-महाराजानां स्मृतिमन्दिरस्य शतवर्षम् उपलक्ष्य विशेषसङ्ख्यारूपेण प्रकाश्यते।

भक्त-विद्वज्जनाः सुरभारतीसेविनः च उभयोः रामकृष्णपार्षदयोः जीवनं, स्मृतिमन्दिरं, तयोः अमृतवाणीं वा आदाय स्वीयसाधुविचारपरैः लेखैः पत्रिकाम् इमां भूषयित्वा अस्माकं कार्तज्ञ्यभाजः अभूवन् इति तान् सादरम् अभिनन्दामः इति

आत्मप्रियानन्दस्वामी
प्रतिकुलाधिपतिः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य

Phone: (033) 26549999
Email: rkmveri@gmail.com / mail@gm.rkmvu.ac.in

# सञ्चारिणी दीपशिखा

सञ्चरति दीपशिखा। तस्या अयम् अष्टमः अङ्कः वेलुडमठस्थितस्य विवेकानन्दस्मृतिमन्दिरस्य ब्रह्मानन्दस्मृतिमन्दिरस्य च शताब्दीसम्पूर्तिम् उपलक्ष्य पवित्रज्यैष्ठामावास्यातिथौ षोडशीदेव्याः पूजादिने प्राकाश्यं नीतः इति प्रमोदस्थानम्। अस्मिन् अङ्के षोडश लेखाः सन्ति।

संस्कृतदर्शनविभागस्य शोधच्छात्रः उत्तमघोषः विवेकानन्दस्वामिपादानां नारीकल्याणचिन्तां सुष्ठु विचार्य स्नेहभाग् भवति। प्राचीनकाले समाजे नारीणां का स्थितिः आसीत्, स्वामिवचनम् अनुसृत्य वर्तमानकाले कथं तासां समुन्नतिः शक्या इत्येते विषयाः निबन्धे तेन विचारिताः।

श्रीरामकृष्णदेवस्य मानसपुत्रत्वेन परिचितस्य ब्रह्मानन्दमहाराजस्य जीवनचरितं बाल्यलीला-साधुसङ्गासक्ति-वैराग्यभावादीनि रमणीयतया वर्णयित्वा प्रशस्यः भवति अस्मद्विभागस्य शोधच्छात्रः प्रलयनन्दी।

गङ्गायां स्थितस्य विविधमतसमन्वयप्रतीकरूपस्य विवेकानन्दमन्दिरस्य निर्माणवृत्तान्तं वर्णयित्वा अस्मद्विभागस्य पूर्वच्छात्रः सम्प्रति केन्द्रियसंस्कृतविश्वविद्यालये संस्कृतभाषाशिक्षकः व्यासदेवमाजी श्लाघ्यो भवति। तस्य च विवेकानन्दमन्दिरस्य स्थापत्यकलां विशिष्य प्रतिपाद्य अस्माकं स्नेहभाक् भवति अस्मद्विभागस्य शोधच्छात्रः शुभदीपदासः।

विभागस्य अपरः शोधच्छात्रः राजेश-अधिकारी, विभागस्य पूर्वच्छात्रः विश्वरूपवेजः च ब्रह्मानन्दमन्दिरस्य निर्माणवृत्तान्तम् उत्कृष्टतया वर्णयित्वा कार्तज्ञ्यभाजौ भवतः।

कठोपनिषदि समुपवर्णितायाः सुप्रसिद्धायाः यमनचिकेतसोः आख्यायिकायाः नाट्यरूपं प्रदाय धन्यवादार्हाः भवन्ति ब्रह्मचारिणः जितेन-रमेन-प्रह्लादवर्याः।

श्रीरामकृष्णपार्षदान्यतमेन सारदानन्दस्वामिना विरचितस्य “भारते शक्तिपूजा” इत्याख्यग्रन्थस्य शक्तितत्त्वपूजापद्धतिनिरूपणाख्यं प्रथमप्रस्तावम् अनूद्य प्रशंसार्हः भवति अस्मद्विभागस्य पूर्वच्छात्रः आवीरलालगङ्गोपाध्यायः।

नवश्लोकमण्डितायाः विवेकस्तुतेः प्रणेता रामकृष्णविद्यामन्दिरस्य शोधच्छात्रः सुमन्तपात्रः प्रशंसावचनैः भूष्यते।

बेलुडमठस्थस्य ब्रह्मचारिप्रशिक्षणकेन्द्रस्य आचार्याः वेदार्थानन्दस्वामिनः रामकृष्णमिशन्-इति संस्थाम् आधाय विनिर्मितस्य “Blooming Lotus of Humanity” इति तथ्यचित्रस्य “मानवतायाः प्रस्फुटितं शतदलम्” इति शीर्षकाङ्कितम् अनुवादं कृत्वा कार्तज्ञ्यभाजः भवन्ति।

अस्मद्विभागस्य सहायकाचार्यः डॉ. गोपीकृष्णन्-रघुः उपजातिच्छन्दनिबद्धं रमणीयं ब्रह्मानन्दषट्कं व्यरचयत्। तस्मै कृतज्ञता विज्ञाप्यते।

सद्गुरुः स्वामी ब्रह्मानन्दः इति शीर्षकाङ्कितं निबन्धं प्रणीय श्लाघार्हो भवति ब्रह्मचारी ईशानचैतन्यः।

विवेकानन्दमन्दिरस्थापनाय ब्रह्मानन्दस्वामिना लिखितस्य आह्वानपत्रस्य संस्कृतानुवादं कृत्वा अस्माकं स्नेहभाक् भवति अस्मद्विभागस्य तृतीयवर्षे अधीयानः शाश्वतझा।

स्वामिगम्भीरानन्देन विरचितस्य स्वामिब्रह्मानन्दचरितस्य संस्कृतानुवादकाय ब्रह्मचारिणे अच्युतचैतन्याय कार्तज्ञ्यं प्रकट्यते।

पूर्वाङ्केषु इव, अस्मिन्नपि अङ्के स्वामिसारदानन्दकृतं श्रीरामकृष्णलीलाप्रसङ्गं

संस्कृतेन अनूद्य धन्यवादार्हो भवति विभागस्य शोधच्छात्रः शान्तनुनायेकः।

अवसरेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीन् आत्मप्रियानन्दस्वामिनः प्रणमामि। अन्येभ्यश्च साह्यम् आचरितवद्भ्यः नामानि अनुच्चार्यैव कार्तज्ञ्यं विज्ञाप्यते।

डॉ. राकेशदाशः
दीपशिखापत्रिकायाः मुख्यसम्पादकः
तथा
विभागाध्यक्षः
संस्कृतदर्शनविभागस्य
रामकृष्ण-मिशन्-शैक्षणिक-शोध-संस्थानस्य
बेलुडमठस्य

# विवेकानन्दस्वामिनां नारीकल्याणचिन्ता

उत्तमघोषः*

“स्त्रीपुरुषयोर्व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः।
नरा न तमवेक्षन्ते तेनात्र वरमङ्गनाः॥ ” इति मनुः।

वयं यदि कस्यापि देशस्य उन्नतिं द्रष्टुकामास्तदानीं तस्य देशस्य नार्यः कथं सन्तीति द्रष्टव्यम्। विविधवर्णवर्णितानां मेघं स्प्रष्टुकामानां चन्द्रचुम्बिनीनामट्टालिकानां सत्त्वेऽपि यदि नार्यस्तत्र वञ्चिताः शोषिता अवमानितास्तदा देशस्य सामग्रिकोन्नयनं न जातमिति निश्चप्रचम्। “There is no chance for the welfare of the world unless the condition of women is improved.” (V7. p.214-15)

अस्माकं समाजे स्त्रीपुरुषौ परस्परं परिपूरकौ। पुरुषा यथा कठोरपरिश्रमे दक्षास्तथा नार्यः अपि गृहसज्जीकरणे सन्तानपरिपालने च श्रेष्ठाः। न हि एकस्य स्थानमपरेण परिपूरयितुं शक्यते, पुरुषाः किं मातृवत्स्नेहेन सन्तानं परिपालयितुं शक्नुयुः? नैव, अतः उभौ एव स्वस्वक्षेत्रे अनन्यौ।

स्त्रीपुरुषयोः उत्पत्तौ अपि वैषम्यं नास्ति। उच्यते यत् प्रजापतिः स्वदेहस्य अर्धभागेन पुरुषमर्धेन च स्त्रियं व्यासृजत्। उक्तञ्च मनुना—

“द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः।” इति॥

अतस्तयोः समप्राधान्यम्। परन्तु अस्माकं समाजे अद्य नार्यः पुरुषैर्दलिता अवहेलिता वञ्चिताश्च दृश्यन्ते। अहो आश्चर्यम् अद्य तु सन्तानजन्मनः प्राक्

---

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

भ्रूणपरीक्षणमपि क्रियते किं पुत्रो भविता उत कन्या, यदि पुत्रः स्यात्तदा गृह्णाति, कन्या चेत्क्वचिद् भ्रूणमेव हन्ति,—एतादृशमतिनिन्दितम् अतिकदर्यं कार्यमद्यापि अस्माकं देशे प्रचलति। किं ते न जानन्ति यत् केवलं पुरुषेणायं प्रपञ्चो न प्रपञ्चितो नापि अग्रेसरः,—"एकेन चक्रेण न रथस्य गतिर्भवेत्।"। एवं पुरुषम्मन्यमानास्ते अपि कस्याश्चिन्मातुरेव गर्भात्प्रसूताः। वस्तुतस्तु स्त्रीपुरुषयोः भेद एव नास्ति। यथा मृत्तिकानिर्मितमेव कदापि घटरूपेण कदापि कलसरूपेण वा व्यवह्रियते, घटकलसाद्युपाधिवर्जने तु मृत्तिका एवावशिष्यते। एवं नारीपुरुषाणां केवलमुपाधौ आकारे च भेदः शुद्धब्रह्मणि तु तयोः भेद एव नास्ति। आम्नातञ्च श्वेताश्वतरोपनिषदि—"त्वं स्त्री पुमानसि त्वं कुमार उत वा कुमारी।" इति॥

प्राचीनकालेऽपि किं नारीणामेतादृशी दुर्दशा आसीद् इति चेत् स्वामिनये नैव, तदा तु विदेहराज्ञो जनकस्य अधिमञ्चं प्रज्ञापारावारपारङ्गता गार्गी कुशलधनुर्धरहस्तस्थितसुतीक्ष्णवाणान् इव स्वप्रश्नान् उत्थापयन् निखिलागमनिष्णातं तर्काजेयं युक्तिविशेषविशदं याज्ञवल्क्यमपि तर्कयुद्धे आह्वयाञ्चकार। रामायणे हृतसीतः रामः यज्ञकरणेऽनधिकारी सञ्जातः, स्वस्त्रियाः सीतायाः प्रतिमूर्तिं निर्माय तत्र प्राणदानानन्तरमेव तस्य यज्ञः समारब्धः। तर्हि कदा आरभ्य नारीणामेषा दुर्दशा सञ्जाता इति चेत् स्वामिनये यदा केचन असंस्कृतब्राह्मणा अस्माकं समाजस्य नियन्तारः सञ्जाताः तत आरभ्य तेषां सारहीनैः कपोलकल्पितैर्नियमैः नारीणां मन्दिरगमनाद्यधिकारा अपहृताः। सतीदाहबाल्यविवाहादिभिः नार्यो जर्जरिताः पाशाभावेऽपि पाशैर्बद्धा इव। तैरेव असारैः नियमांशैरद्यापि वयं प्रचलिता अन्धेनैव नीयमाना यथान्धाः, दृश्यते च महाराष्ट्रस्य केषुचिन्मन्दिरेषु अद्यापि नारीणां प्रवेशो नास्ति।

अमेरिकादेशे भाषणकाले एकदा स्वामिवर्या उक्तवन्तः यत्—"There is no chance for the welfare of the world unless the condition

of the women is improved. It Is Not Possible for a Bird to Fly on Only One Wing.” इति। नारीणामुन्नतिं विना विश्वोन्नतिः नैव इत्यर्थः।

नारीणामुन्नतिविषये स्वामिनः प्रथममभिमतं भवति शिक्षा। नारीणां समस्याः वयं पुरुषास्तथा नावगच्छामो यथा नार्योऽवगच्छेयुः। अतोऽस्माभिः ताभ्यो यथार्थशिक्षा प्रदेया। इतिहासपुराणविज्ञानपुराणादिभिः सह लौकिकानां सीवनरन्धनादीनामपि शिक्षा प्रदेया। एवं क्रमेण सर्वथार्जितमतयः सुशिक्षिताः ताः स्वयमेव स्वसमस्याः समाधास्यन्ति। अतो मद्रासप्रदेशे भाषणकाले स्वामिनोक्तम्—“Educate your women first and leave them to themselves; then they will tell you what reforms are necessary for them. In matters concerning them, who are you?” नारीणां समस्याः पुरुषा एव समाधातुं प्रयतन्ते, तासां भागधेयं पुरुषा एव निर्मातुमिच्छन्तीत्येव सर्वसमस्याया मूलमिति क्यालिफोर्नियाप्रदेशे भाषणकाले स्पष्टीकृतम्—“Women will work out their own destinies—much better, too, than men can ever do for them. All the mischief to women has come because men undertook to shape the destiny of women.” एतदर्थं स्वामिविवेकानन्दो भगिनीनिवेदितां नियुक्तवान्। भगिनीनिवेदिता च कोलकातायामेकं बालिकाविद्यालयं निर्मितवती। पुनश्च तस्मिन् काले या बालिका विद्यालयं गच्छन्ति तासां विवाह आसीत् दुर्लभः। अतः भगिनी निवेदिता गृहं गृहं गत्वा पितरौ बोधयित्वा बालिकासङ्ग्रहमकरोदित्यपि श्रूयते।

द्वितीयं भवति पूर्वगौरवस्मरणम्, अस्माकं नारीषु स्वजातौ विश्वासो नास्ति। यदा नारीणां विवादो भवति तदानीं यदि तत्र एका नारी समाधत्ते तदानीं ता न परितुष्यन्ति, यदि एकः पुरुषस्तत्र समाधत्ते तदा नार्यः परमसन्तोषं प्राप्नुवन्ति। नार्यो बोधनीया यत् ता न दुर्बलाः, प्राचीनकाले रानी

लक्ष्मीवाई तु एकेन ब्रिटिश्जनशोणितपिपासुना शताधिकजनपञ्चत्वप्रापकेण करकम्पितकृपाकृपणकृपाणेनैव स्वराज्यरक्षार्थम् अन्तिमशोणितपर्यन्तं ब्रिटिश्जनैः युयोध। मातङ्गिनी हाजारा अपि ब्रिटिश्जनानां गोलिकावर्षणेन क्षतविक्षता भूमौ पतिता, परन्तु राष्ट्रध्वजं न तत्याज। एवं पूर्वगौरवस्मरणेन यदास्माकं नार्यो दृढचेता निर्भयाः स्वतन्त्राश्च भविष्यन्ति तदा एव तासामुन्नतिः सम्भवति, अन्यथा नैव।

तृतीयं भवति पवित्रता। नार्यैः सर्वदैव पवित्रता स्वप्राणैरपि रक्षणीया। विदेशेषु नार्यः भार्यारूपेण प्रसिद्धाः, परन्तु अस्माकं देशे मातृरूपेण। स्वदेशमन्त्रे स्वामिनोक्तं यद् अस्माकं नारीणामादर्शः भवति सीता सावित्री दमयन्तीति। पाश्चात्यविषये एवं श्रूयते यत् एका पत्नी पतिं प्रति कथयति यत् तव पुत्रः मम पुत्रश्च अस्माकं पुत्रेण कलहायते- एतस्य तात्पर्यं यत् पत्न्याः पत्युश्च अन्यत्रान्यत्र पुत्रो जात इति। परन्तु अस्माकं तथा नास्ति, अस्माकं नारीणामेकपतित्वं तु समग्रविश्वे समादृतम्। समग्रजीवने सीता स्वपतिं विना अन्यं कमपि पुरुषं नैवास्पृशत्। अस्माकन्नारीषु एवमेव पातिव्रत्यम् आवश्यकम्। अन्यथा "स्त्रीषु दुष्टासु जायते वर्णसङ्करः, सङ्करो नरकायैव" इति। अस्माकं नारीणामादर्शाः सीता-सावित्री-दमयन्त्याद्याः इति स्वामिना स्वदेशमन्त्रे समुद्घोषितम्। विदेशेषु भारतीयनारीणामादर्शविषये क्वचित्तेनोक्तम्—"Every girl in India must aspire to be like Savitri, whose love could not be conquered by death, and who through this tremendous love snatched back from even Yama, the soul of her husband." एतदर्थमेव स्वामिना स्त्रीमठः चिन्तितः। नदीनां जलधारा यदा एकत्रीक्रियते तदा एव तत्र महद्गतिरुत्पद्यते, तत्र च यन्त्रेण विद्युदुत्पादयितुं शक्यते। एवं मठे जपध्यानादिना ब्रह्मचर्यपालनेन यदा नारीणां विक्षेपशक्तयः एकत्र पूर्णतां यास्यन्ति तदा एव तच्छक्त्या कार्यं सिध्यति, तासामुन्नतिश्च जायते।

परन्तु अधुना नग्नता एवाधुनिकतायाः परिमापिका सञ्जाता। अत एव प्रतिदिनं नारीनिर्यातनं वर्धमानमेव दृश्यते। अतः अस्माभिः सङ्कल्पवद्भिः भवितव्यं यत् स्वामिना दर्शितं मार्गमनुसृत्य नारीणां समुन्नत्या भारतं देवभूमित्वेन प्रतिष्ठाप्य विश्वस्मिन् भारतं मूर्धन्यस्थानं प्रापयामो, यतो हि- यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता इति।



[बेलुडमठे स्वामिविवेकानन्दमन्दिरे स्वामिविवेकानन्दस्य चित्रम्]

# प्रभोः मानससुत जय श्रीराखाल

प्रलयनन्दी*

## भविष्यद्वाणी

पुण्यसलिलाया गङ्गायाः तीरे अवस्थिते दक्षिणेश्वरे श्रीश्रीजगन्मातुः साधनायां निमग्नो भववैद्यः परमहंसदेवः श्रीरामकृष्ण एकदा जगन्मात्रे निवेदितवान्—"मातः! विषयासक्तैः जनैः कथोपकथनेन मम जिह्वा ज्वलितेव अनुभूयते, नूनं त्यागिनां सङ्गलाभः कदा भविता?"। तदा भवतारिण्या आश्वासः प्रदत्तः—"मा भैषीः! शुद्धसत्त्वाः त्यागिनः अचिरादेव आगमिष्यन्ति" इति। तदनुसारं यथाकालं त्यागव्रता युवकाः दक्षिणेश्वरम् आगन्तुम् आरब्धवन्तः। एतेषु अन्तरङ्गेषु युवकेषु परमहंसदेवस्य उच्चकोटिकः शिष्यस्तथा मानसपुत्र आसीत् श्रीयुक्त-राखालचन्द्र-घोषः। एकदा भावसमाधौ निमग्नेन श्रीरामकृष्णेन दृष्टम्—साक्षाद् जगन्माता एकं माणवकं सहसा आनीय तस्य क्रोडे संस्थाप्य निर्दिशति—"अयं तव पुत्रः"। आबाल्याद् ब्रह्मचर्यम् आचरति रामकृष्णे सन्त्रस्ते माता आश्वासितवती—"न संसारिपुत्रः, अपि तु त्यागव्रतो मानसपुत्रः।" इति। ततः परं राखालं दृष्ट्वा परमहंसदेवस्य निश्चयो जातः—सोऽयं भावसमाधौ दृष्टो मानसपुत्र इति।

## बाल्यलीला

राखालचन्द्र-घोषः १८६३ क्रैस्ताब्दे जनवरीमासस्य एकविंशे दिवसे तथा १२६९ वङ्गाब्दे माघमासस्य अष्टमे दिवसे, चान्द्रमाघस्य शुक्लद्वितीयायां तिथौ, वसिरहाट्-उपमण्डलान्तर्गते शिकरा-कुलीन-ग्रामे अजायत। तस्य पिता

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

आनन्दमोहन-घोषः प्रतिपन्नः भूमिपतिः आसीत्। राखालस्य पञ्चमे वयसि तस्य माता कैलासकामिनीदेवी दिवं गता। इतःपरम् आनन्दमोहनेन द्वितीयवारं दारपरिग्रहे कृते राखालो विमातुः हेमाङ्गिन्याः क्रोडे सस्नेहं लालितः पालितश्च।

पित्रा गृहसमीपे प्रतिष्ठापिते विद्यालये राखालस्य यथासमयं विद्याभ्यास आरब्धः। सौम्याकृतिः कोमलप्रकृतिश्च तस्य प्रधानं वैशिष्ट्यम् आसीत्, अतः अचिरादेव स स्वबान्धवानां मध्यमणिः सञ्जातः। मल्लयुद्धे, क्रीडायां च तस्य असाधारणं नैपुण्यम् आसीत्। मध्ये मध्ये ग्रामस्य समीपे स्थितस्य कालीमन्दिरस्य उद्याने स्वहस्तेन श्यामामूर्तिं निर्माय तस्य पूजायां मग्नो भवति स्म। सङ्गीते तस्य अतीव प्रीतिः अवर्तत; मध्ये मध्ये ग्रामस्य निर्जने स्थाने उपविश्य बान्धवैः मिलित्वा श्यामासङ्गीतं गायन् तन्मग्नो भवति स्म। कदाचित् कस्यापि समीपे अज्ञातं श्यामासङ्गीतं शृणोति चेद् अचिरादेव तद् आयत्तीकरोति स्म, एवमेव वैष्णवभिक्षुकाणां मुखाद् मुरलीधरस्य गोपालस्य गीतं शृण्वन् तन्मयो भवति स्म।

### साधुसक्तः

द्वादशवर्षे आङ्गलशिक्षार्थं राखालः पित्रा कलिकाताम् आनीतः, तत्रत्ये ट्रेनिं-एकाडेमी–प्रतिष्ठाने च तस्य पाठ आरब्धः। द्वितीयमातामहस्य आलये तस्य वासव्यवस्था प्रकल्पिता। अस्मिन् समये एव नरेन्द्रनाथेन तस्य साक्षात्कारो जातः। तस्य साहचर्यं प्राप्य राखालस्य ब्रह्मसमाज-प्रभृतिषु प्रतिष्ठानेषु गमनागमनम् आरब्धम्। अनेन अध्ययनहानिम् आशङ्क्य पित्रा राखालः कठोरं तिरस्कृतः। तथा कृतेऽपि राखालस्य तथा गमनागमनस्य परिवर्तनं नाजायत। तदवलोकनेन परिजनानाम् अनुरोधेन च पित्रा अष्टादशे वर्षे राखालस्य विवाहः स्थिरीकृतः।

राखालं संसारपथि प्रेरयितुं तस्य विवाहः कारितः, परन्तु जगन्मातुः अन्यैव अभीप्सा अवर्तत। राखालस्य ज्येष्ठः श्यालः मनोमोहनः आसीत् श्रीरामकृष्णस्य

चरणाश्रितः, श्वश्रूमाता अपि रामकृष्णदेवे भक्तिमती आसीत्। अतो विवाहात् परं मनोमोहनेन साकं राखालस्य दक्षिणेश्वरे गमनागमनम् आरब्धम्। राखालस्य प्रथमदर्शने एव परंहंसदेवस्य निश्चयो जातः—अयमेव जगन्मात्रा निर्दिष्टो मे मानससुत इति। राखालोऽपि प्रथमदर्शने रामकृष्णदेवस्य स्वभाविकेन माधुर्येण तं प्रति आकृष्टः। इतःपरं तस्य दक्षिणेश्वरे नित्यं गमनागमनम् आरब्धम्। परमहंसदेवस्य संस्पर्शेन राखालस्य अलौकिकी उपलब्धिः समारब्धा; बालकभावे निमग्नेन तेन कदाचित् श्रीरामकृष्णस्य क्रोडे उपविष्टम्, कदाचित् तस्य हस्तात् परमानन्देन सर्पिरादि भुक्तम्, कदाचित् तस्य स्कन्धम् आरुह्य क्रीडितम्। एकदा राखालस्य विषये परमहंसेन सूचितम्—"राखालः साकारभावस्य आधारः, नरेनः (नरेन्द्रनाथः) निराकारभावस्य" इति।

एतादृशीम् अलौकिकीं लीलां सन्दृश्य पिता आनन्दमोहनः राखालस्य अध्ययनहानिं तथा संसारवैराग्यभावम् आशङ्कितवान्। तस्य पुत्रः साधुसङ्गेन कदाचित् सन्न्यासी स्याद् इत्यादि आशङ्क्य एकदा स दक्षिणेश्वरात् प्रत्यागतं राखालम् एकस्मिन् प्रकोष्ठे अवरुद्धवान्। परन्तु निर्झरस्रोत इव राखालस्य भावप्रवाहः अवरोद्धुम् अशक्यः आसीत्, अतः अवकाशं दृष्ट्वा राखालः पुनरपि दक्षिणेश्वरे समुपस्थितः। इतःपरं तं प्रत्यानेतुं पुनरपि दक्षिणेश्वरं प्रस्थितः तस्य पिता परमहंसस्य सकाशाद् राखालस्य गुणसमूहं श्रुत्वा अन्ततो निरस्तः; मातृहीनस्य राखालस्य बाल्यकालीनाम् अवस्थाञ्च संस्मृत्य तं प्रति कोमलतां प्राकटयत्। दक्षिणेश्वरे पुत्रस्य उत्फुल्लवदनं सोल्लासप्रवृत्तिञ्च अवलोक्य तत्रैव तस्य अवस्थितिम् अनुमोदितवान्। अतःपरं राखालो बहुशः गृहं गतः, तस्य पत्नी विश्वेश्वरी अपि सकृद् दक्षिणेश्वरं समागता किन्तु तस्य दैवभावनिमग्नता तदवस्थैव संस्थिता। परमहंसदेवोऽपि राखालपत्नीं परीक्ष्य तस्यां देवीशक्तिञ्च आविष्कृत्य निरचिनोत्—"राखालस्य ईश्वरभक्तेः हानिः न सम्भविता इति।"

**मानसपुत्रः**

भगवान् श्रीरामकृष्णः अजानाद् यद् राखालः साक्षाद् व्रजस्य गोपालः, अतो गोपाल इति नाम्नैव तं सम्बोधयति स्म। राखाले पुत्रस्नेहम् आपन्नः परमहंसदेवः तं पुत्रवदेव परिपालयति स्म; पुत्रमिव आद्रियत अशासयच्च। माता यथा अपरेण पुत्रस्य शासनं न सहते तथा रामकृष्णदेवः अपरेण राखालस्य शासनं नासहत। तुल्यरीत्या, पुत्रो यथा मात्रा अन्यस्य आदरं न सहते तथा राखालोऽपि परमहंसदेवस्य अन्येषु भक्तेषु स्नेहं न सहते स्म।

अस्मिन् समये हठाद् राखालस्य अनारोग्ये जाते स्वास्थ्योन्नतये स बलरामवसुना सह वृन्दावनं वव्राज। श्रीकृष्णस्य लीलाभूमौ तेन विशेष आनन्दः अनुभूतः, शरीरमपि स्वस्थं जातम्। ततो मासत्रयात्मके काले व्यतीते स्वस्थो राखालः पुनः दक्षिणेश्वरं प्रत्यागत्य प्रभोः सेवायां निमग्नो जातः। परन्तु मध्ये मध्ये रोगाक्रान्तत्वात् तस्य शरीरं पुनरपि रुग्णं जातम्। तद्विषयं विचिन्त्य परमहंसदेवस्य उद्वेगः स्यादिति आशङ्क्य राखालः स्वगृहं प्रस्थितः। संसारभोगः अवशिष्ट इति विज्ञाय रामकृष्णदेवः अनिच्छन्नपि राखालस्य स्वगृहावस्थानम् अनुमोदितवान्। इत्थं किञ्चित्कालं स्वगृहे न्युष्य आरोग्यं च संलभ्य राखालः पुनरपि दक्षिणेश्वरं समागत्य तत्र वासम् आरब्धवान्।

**वैराग्यापन्नः**

इतःपरं श्रीरामकृष्णस्य गलरोगे वर्धिते स काशीपुरस्थम् उद्यानगृहम् आनीतः, तत्र अन्यैः युवभक्तैः साकं राखालोऽपि गुरुसेवायाम् आत्मानं नियुक्तवान्। गुरुसेवया राखालस्य सांसारिकी चिन्ता क्रमशः अपगता। अस्मिन् समये राखालस्य एकः पुत्रसन्तानः सञ्जातः, परन्तु सन्देशोऽयं संसारमायातः सर्वतोभावेन विनिर्मुक्तस्य राखालस्य चेतसि कमपि विकारं नाजनयत्। लीलावसानस्य समीपवर्तिनि काले रामकृष्णदेवः रामकृष्णसङ्घस्य स्थापनविषये नरेन्द्रनाथं विविधानि तत्त्वानि उपदिष्टवान्। तदवसरे तेन विज्ञापितम्—

“राखालो राजबुद्धिः, स एकाकी एव सम्पूर्णमेकं राज्यं परिचालयितुं समर्थ इति”। तद्विषयं संस्मृत्य नरेन्द्रः राखालं ‘राजा’ इति नाम्ना अभिहितवान्। अनन्तरं रामकृष्णसङ्घे राखालः ‘महाराज’ इति नाम्नैव प्रसिद्धिम् अलभत।

श्रीरामकृष्णेन लीलासंवरणे कृते महाराजस्य हृदयं श्रीरामकृष्णस्मृत्या अननुवर्णनीयव्यथया च भाराक्रान्तं सञ्जातम्। काशीपुरस्थम् उद्यानगृहं त्यक्त्वा बलरामवसोः गृहम् आगत्य तत्रैव स वासम् आरब्धवान्। क्रमशो वराहनगरे मठे संस्थापिते अन्यैः गुरुभ्रातृभिः साकं महाराजोऽपि तत्र सन्न्यासिजीवनम् आरब्धवान्। आँटपुराभिधे ग्रामे गुरुभ्रातुः वावुरामस्य गृहप्राङ्गणे सर्वैः गुरुभ्रातृभिः सन्न्यासग्रहणं कृतम्, तत्र महाराजस्य ‘ब्रह्मानन्द’ इति सन्न्यासनाम अभूत्। अस्मिन् समये वराहनगरस्थे मठे वासकाले महाराजस्य पिता आनन्दमोहनः मध्ये मध्ये आगत्य तं गृहं नेतुम् अचेष्टत। चरमवैराग्यम् आपन्नो महारजस्तदा गुरूपदेशम् संस्मृत्य कठोरतां परित्यज्य पितरं कोमलवचनेन सन्तोष्य तं गृहं प्रेषयति स्म। तस्मिन् काले महाराजेन मायिकसम्बन्धो यथार्थत एव परित्यक्त आसीत्। अतः तस्मिन् समये पत्न्याः दशवर्षीयस्य पुत्रस्य च वियोगेऽपि स सुमेरुवद् अचल आसीत्।

**साधनासक्तः**

अतःपरं मठस्य विविधेषु कार्येषु महाराजो निमग्नो जातः। परन्तु तथा अवस्थाने साधनमार्गात् चित्तं विक्षिप्तं स्यात् किञ्च सन्न्यासिभिः निभृते साधनम् आचरणीयम् इत्यादि विचिन्त्य महाराजः तीर्थभ्रमणाय व्यग्रः सञ्जातः। तदा गुरुभ्रातुः नरेन्द्रनाथस्य अनुमतिं स्वीकृत्य स श्रीश्रीमात्रा सह नीलाचलं प्रस्थितः। तत्र बलरामवसोः गृहे मातुः वासव्यवस्थां प्रकल्प्य अपरैः साकं महाराजः भीक्षाटनम् आरब्धवान्, जगन्नाथदर्शनेन ध्यानजपादिना च कालयापनं कृतवान्। परन्तु क्रमशो महाराजस्य शरीरे रुग्णे जाते तदवस्थायां स्वेच्छानुसारम् आहारादिना तपो न सम्भवतीति विचिन्त्य महाराजः पुनरपि वराहनगरमठं

प्रत्यागतः। महाराजस्य निभृते साधनाया आकाङ्क्षा अनिवृत्ता सती अन्तःसलिला फल्गुनदीव प्रवहमाणा अवर्तत।

अतःपरं १८८९ क्रैस्ताब्दे सुबोधानन्दस्य साहचर्यम् आदाय महाराजः उत्तराखण्डाभिमुखीं यात्राम् आरब्धवान्। वैद्यनाथस्य दर्शनं कृत्वा वारणसीं प्राप्य तत्र कानिचन दिनानि महाराजेन ध्यानजपाद्याचरणेन व्यतीतानि। ततो नर्मदानदीतीरम् उपेत्य तीर्थदर्शनं च कृत्वा श्रीद्वारकाधाम प्रति प्रस्थितः। तत्र समुद्रे पुण्यस्नानं सम्पाद्य सुदामापुरी-जुनागड-प्रभृतीनि स्थानानि भ्रमित्वा अहमदावादनगरं प्राप्तः। तदनु राजपूतनास्थानि तीर्थानि परिदृश्य पुष्करतीर्थम् उपस्थितः। तत्र शरीरे रुग्णे जाते अजमेरस्थे स्वास्थ्यालये कानिचन दिनानि विश्रम्य उत्तराखण्डगमने सुबोधानन्दम् अनुमत्य स्वयं वृन्दावनं समुपस्थितः। तत्र बहूनि दिनानि महाराजेन भिक्षाटनेन साधनया च व्यतीतानि। तीर्थभ्रमणकाले बहवो जनाः संस्पर्शे आगताः, महाराजस्य वचनमाधुर्येण च अभिभूताः। इतःपरं हरिद्वारं गत्वा तीर्थानि भ्रमित्वा अन्यैः गुरुभ्रातृभिः सह विविधानि तीर्थस्थलानि परिदृश्य तुरीयानन्देन सह महाराजः पुनरपि वृन्दावनं समागतः। तत्र कतिचन दिनानि व्यतीत्य मठस्य परिचालने साहाय्यार्थं च महाराजः कलिकातां प्रत्यागतः।

### सङ्घाध्यक्षः

अपरतः पाश्चात्त्यभूमौ लब्धयशाः स्वामिविवेकानन्दः तदा भारतं समागतः। तस्मिन्नवसरे सर्वैः गुरुभ्रातृभिः आलोचनं कृत्वा १८९७ क्रैस्ताब्दे मे-मासस्य प्रथमे दिवसे रामकृष्ण-मिशन् प्रतिष्ठापितम्। संस्थायाः कलिकाताकेन्द्रस्य कार्यभारः महाराजाय प्रदत्तः। इतःपरं मठस्य विविधानि कार्याणि महाराजस्य तत्त्वावधाने सम्पन्नानि। १९०१ क्रैस्ताब्दे स्वामिविवेकानन्देन मठस्य सम्पूर्णः कार्यभारः गुरुभ्रातृषु समर्पितः, 'राखालः राजबुद्धिः' इति गुरुवचनं च संस्मृत्य महाराजः प्रतिष्ठानस्य सभापतिरूपेण निर्वाचितः।

शैशवकालादेव स्वामिविवेकानन्देन सह महाराजस्य सख्यम् आसीत्।

अतस्तयोः प्रायशः हास्यकलहादि अदृश्यत। सभापतिः भूत्वापि महाराजः सर्वाण्यपि कार्याणि स्वामिविवेकानन्दं संसूच्यैव निर्वर्तयति स्म। स्वामिचरणा अपि कदाचित् कोपवशात् महाराजं भर्त्सयित्वा पुनः तं क्षमां याचन्ते स्म। इत्थम् अनयोः अलौकिकः प्रमेभावः अन्यान् अपि साधुब्रह्मचारिणः मोदयति स्म। परन्तु इदं सौहार्दम् स्वल्पेषु दिनेषु समाप्तम्—स्वामिचरणा महासमाधौ लीनाः। तदा बलराममन्दिरे निवसन् महाराजः संवादं प्राप्य अचिरादेव मठम् आयातः। स्वामिचरणानां निश्चलं शरीरं दृष्ट्वा तेषां वक्षस्थले पतित्वा महाराजो रोदनम् अकरोत्। बाष्पोद्गमाद् गद्गदकण्ठया गिरा अन्वशोचयत् च—"यथा पुरतो विद्यमान एकः सम्पूर्णो हिमालयः सहसा अदृश्यो जातः" इति।

**कर्मनिष्ठः**

स्वामिविवकानन्दे रामकृष्णलोकं गते महाराजेन अनुभूतं—मठसञ्चालनं कियद् दुष्करमिति। तथापि गुरून् स्मृत्वा निपुणतया सर्वाणि कार्याणि समपादयत्। तस्य प्रधानं कार्यम् आसीत् मठस्य प्रतिकेन्द्रं गत्वा परमहंसदेवस्य भावप्रचारः तथा भक्तान् सङ्गृह्य तत्तत्केन्द्राणां सुप्रतिष्ठापनम्। महाराज आसीत् साक्षाद् नारायणः, यद्यद् वस्तु तेन संस्पृष्टं तत्तद् वस्तु अचिरादेव सम्पूर्णताम् प्राप्नोत्। सम्पूर्णे भारते—विशेषतः दक्षिणभारते तथा उत्तरभारते बहुषु स्थलेषु तेन नैकशो रामकृष्ण-मिशन्-केन्द्राणि संस्थापितानि। एतेषां स्थायित्वं निश्चित्य नूतनानां केन्द्राणां संस्थापनाय महाराजः हरिद्वार-प्रयाग-काशी-वृन्दावनादीनि विभिन्नानि स्थानानि गत्वा भक्तान् आदाय च बहूनि केन्द्राणि प्रतिष्ठापितवान्। यत्र यत्र महाराजस्य अवस्थितिः आसीत्, तत्र तत्र ध्यान-जपाद्यनुष्ठानैः नित्यम् आनन्दस्रोतः प्रवहति स्म। सभापतेः आसने अधिष्ठितस्य महाराजस्य मठस्य सर्वेष्वपि विषयेषु तीक्ष्णा दृष्टिः आसीत्। साधनरतानां साधूनां ब्रह्मचारिणां च स्वास्थ्यसंरक्षणे स सततं यत्नशीलः अदृश्यत।

श्रीरामकृष्णवत् श्रीश्रीमातुः अपि महाराजे अतिशयः पुत्रस्नेह आसीत्।

अत एव मठकार्येषु निरतस्य महाराजस्य मध्ये मध्ये स्वास्थ्यहानेः संवादं श्रुत्वा सा व्याकुलीभवति स्म। एकदा श्रीश्रीरामकृष्णस्य जन्मोत्सवम् उपलक्ष्य मठप्राङ्गणे आन्दुल-कालीकीर्तन-समित्या गीतम् अनुष्ठीयमानम् आसीत्। भावसमाधौ निमग्नः महाराजः सहसैव प्राङ्गणं समागत्य नृत्यम् आरब्धवान्। दीर्घक्षणे निवृत्तेऽपि महाराजस्य समाधिर्न भग्नः। तदा द्वितले स्थिता व्याकुला माता नीचैः आगत्य सस्नेहं महाराजम् आहूय तं साधारणभूमौ अवतारितवती। महाराजस्यापि मातरि परा भक्तिः आसीत्। अतो मात्रा लीलासंवरणे कृते महाराजः अबोधशिशुरिव दशदिनानि नग्नपदाभ्यां स्थित्वा हविष्यान्नं गृहीतवान्।

## महासमाधिः

सर्वदा भक्तैः समाविष्टस्यापि महाराजस्य मनः सर्वदा ब्रह्मानन्दलोके विचरति स्म। श्रीरामकृष्ण एकदा सूचितवान्—"राखालेन स्वस्वरूपे अवगते सति तस्य स्थूलशरीरं न स्थास्यति" इति। अतः शरीरे क्रमशो भग्नेऽपि महाराजः तद्विषये सततम् उदासीन आसीत्। १९२२ क्रैस्ताब्दे मार्च्-मासस्य चतुर्विंशे दिवसे महाराजः विसूचिकारोगेण आक्रान्तो जातः। रोगस्य चिकित्साकाले एव शरीरे बहुमुत्ररोगस्य लक्षणम् अदृश्यत। एप्रिल्-मासस्य अष्टमे दिवसे रात्रिकाले महाराजस्य अपूर्वं दर्शनम् अभवत्। अन्यत्र अवस्थितेभ्यो भक्तेभ्य आशीर्वादं प्रदाय तत्रोपस्थितेभ्यः साधुब्रह्मचारिभ्यः अभयं दत्तवान्—"मा भैष्ट; ब्रह्म सत्यम्, जगद् मिथ्या" इति। ततो गभीरध्याने निमग्नः महाराजः व्रजगोपालस्य दिव्यं रूपं दृष्टवान्। अनया रीत्या परवर्त्यपि दिवसो व्यतीतः। तत एप्रिल्-मासस्य दशमे दिवसे सोमवासरे रात्रौ पादोन-नववादने श्रीरामकृष्णस्य मानसपुत्रः राखालः नित्यलीलां प्रविष्टः। मङ्गलवासरे महाराजस्य पूतो देहो वेलुडमठम् आनीय पुष्पचन्दनधूपादिभिः पवित्रे होमाग्नौ आहूतः।

# महामानवरूपिशिवस्य स्मृतिमन्दिरसन्दर्भे

श्रीव्यासदेवमाजी*

'तदेजति तन्नैजति तद्दूरे तद्वन्तिके'[१] इति श्रुत्यनुसारं ज्ञानिनः कृते ईश्वरः अन्तिके अर्थात् निकटे विराजते, परन्तु अज्ञानीनः कृते तद्दूरे। वस्तुतस्तु ईश्वरः सर्वत्र राजते इत्यत्र नास्ति संशयः, किन्तु यदि वयं तस्यान्वेषणार्थं सर्वत्र प्रयतामहे तर्हि मनः अपि सर्वत्र अटेत्, अस्थिरकारणात् एकस्मिन् लग्नं न स्यात्। अत एव प्रयोजनं तादृशं स्थानं, यत्र अस्माकं विकीर्णं मनः ईश्वराभिमुखी भवेत्। तत्स्थानमेव मन्दिरम्। यत्र जनाः सर्वाणि पार्थिवोद्देश्यानि परित्याज्य उपासनार्थं मन्दिरं यान्ति। यतः पवित्रं तत्स्थानम् ईश्वरस्यास्तित्वेन परिपूर्णमस्ति।

ईश्वरस्य आवश्यकतायां मन्दिराणि न निर्मीयन्ते, अपि तु भक्तानाम् आवश्यकतायै। यत्र भक्ताः साकाररूपेण ईश्वरं प्राप्य तस्मिन् तीर्थे स्वकामनावासनादिभ्यः मुक्तिं प्रार्थयन्ति। बेलुडमठे महामानवरूपिदेवस्य स्वामिविवेकानन्दस्य इत्थमेकं स्मृतिमन्दिरं वर्तते। तद्विषये किञ्चिज्ज्ञानं प्रसारयामः।

## मन्दिरनिर्माणे स्थलचयनम्

मठे कस्मिन् स्थाने स्वपार्थिवदेहस्य दाहसंस्कारादिकार्यं भवेत्, तद्विषये विवेकानन्दस्वामिपादेन पूर्वमेव सूचना प्रदत्ता। विषयेऽस्मिन् स्वामिपादः विभिन्नेषु कालेषु गुरुभातृन् प्रति स्वेच्छाम् प्राकटयत्। स्वामिपादस्य ईप्सिततमम् आसीत् मठस्थदक्षिणपूर्वकोणस्थं गङ्गातटस्थबिल्वदेवदारुवृक्षसंलग्नस्थानम्। लब्धे समये स्वीमिपादः सानन्दं तत्र व्रजते स्म। सः एकदा

* संस्कृतभाषाशिक्षकः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य, नवदेहल्याः।

१ ईशोपनिषत् - ५

ब्रह्मानन्दस्वामिनमवोचत्—राजन्! अत्र मह्यं किञ्चित् स्थानं दातुं शक्यते वा?[२]

श्रीश्रीमातुः सारदादेव्याः मन्त्रशिष्यस्य स्वामिसारदानन्दस्य भ्रात्रा ब्रह्मचारिप्रकाशचन्द्रेण ज्ञापितं यत्, एकदा स्वामिपादः सारदानन्देन सह मठे अटन् तत्स्थानं दर्शयित्वा अवदत्, 'समीपे ठाकुरस्य चितास्मृतिः, मन्मतानुसारेण सम्पूर्णमठभूमौ स्थानमिदं सर्वोत्कृष्टम्।'[३]

पार्थिवदेहत्यागात् त्रिभ्यः दिवसेभ्यः पूर्वं स्वामिपादेन गुरुभ्राता स्वामिप्रेमानन्दः सुस्पष्टनिर्देशः प्राप्तः, यतो हि तस्मिन्नेव दिवसे अपराह्णे मठस्य तृणाच्छादितभूमौ व्रजमानः स्वामिपादः दक्षिणदिशि गङ्गातटनिकटे बिल्ववृक्षसमीपे स्थानमेकं प्रदर्श्य गम्भीरतापूर्वकमवदत्, 'मम देहगमनानन्तरं तत्र सत्कारं करिष्यथ।'[४] स्वामिपादानां तिरोभावानन्तरं परस्मिन्नेव दिवसे प्रातःकाले सारदानन्दस्वामिपादः एतानि सर्वाणि वचनानि सहसा स्मृत्वा यत्स्थानं स्वामिना सर्वोत्कृष्टमिति सूचितमासीत् तद्दाहसंस्कारार्थं विवेचितम्।

## स्मारकमन्दिरस्य निर्माणकार्यारम्भे

स्वामिविवेकानन्दस्मृतिमन्दिरस्य रूपकारः स्वामिविज्ञानानन्दः। तस्मिन्नेव स्वामिविवेकानन्दः श्रीरामकृष्णमन्दिरस्य निर्माणकार्यमसमर्पयत्, अतः स्वामिनः दृष्टिभावं मनसि निधाय रामकृष्णमन्दिररूपरेखाधारेणैव स्मृतिमन्दिरस्य आकारः प्रदत्तः। मन्दिरनिर्माणकाले कार्यरतानां जनानां मनसि श्रद्धाभावस्य जागरणाय वदति स्म, 'पश्यन्तु वत्साः, सम्यग्रूपेण कार्यं कुर्युः। एतच्छिवमन्दिरं निर्मान्ति। सावधानाः भवन्तु, सावधानाः भवन्तु।'[५]

---

२ *स्वामी ब्रह्मानन्देर स्मृति कथा*; चेतनानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; २००३; पृष्ठा - १४७

३ *युगनायक विवेकानन्द* (तृतीयखण्डम्); गम्भीरानन्दः, स्वामी; उद्बोधनकार्यालयः; कलकाता; १९६६; पृष्ठा - ३७०

४ तदेव

५ *विज्ञानानन्देर स्मृतिकथा*; स्वामिचेतनानन्दः, उद्बोधनकार्यालयः; २०१४; पृष्ठा–२५१-५२

स्मृतिमन्दिरस्य निर्माणसिद्धान्तः शीघ्रञ्च तस्योपक्रमः इत्यासीत् गुरुभातृभिः स्वामिनं प्रति गहनप्रेम्णः अभिव्यक्तिः। परन्तु स्वामिविवेकानन्दस्य स्मारकमन्दिरस्य कार्यारम्भे प्रायःसार्धचतुर्वर्षाणि यावत् समयः व्यतीतः। अस्य मुख्यकारणमासीत् धनाभावः। स्वामिब्रह्मानन्दः १९०६ तमवर्षस्य फेब्रुयारीमासस्य १ दिनाङ्के अभेदानन्दं प्रति स्मृतिमन्दिरनिर्माणार्थम् आवश्यकधनस्याभावविषये अलिखत्, 'मठः अचलस्थितौ, अर्थागमनस्य प्रायः पूर्णतया स्थगितत्वात् श्रीश्रीठाकुरस्य स्वामिनश्च भावप्रचारकार्यं पूर्णतया अवरुद्धम्।'[६] ईप्सितमन्दिरस्य योजनादृष्ट्या इष्टधनाभावात् न केवलं साधवः अपि तु गृहस्थभक्ताः चिन्तिताः आसन्। यद्यपि किञ्चित् साहाय्यमागतम् (विविधपत्रेभ्यः लभ्यते) परन्तु तस्य अपर्याप्तत्वात् मन्दिरनिर्माणे बिलम्बः जातः।

### मन्दिरनिर्माणे प्रथमचरणम् (१९०७-१९०९)

१९०७ तमे वर्षे मार्चमासस्य १० दिनाङ्के स्वामिविवेकानन्दमन्दिरस्य आधारः स्थापितः (भित्तिपत्तनम्)। दिनत्रयानन्तरं स्वामिविज्ञानन्दः इलाहवादतः आगत्य मन्दिरनिर्माणस्य निरीक्षणम् आरब्धवान्। क्रमेण एकतलमन्दिरस्य निर्माणम् एकवर्षेण सम्पन्नम्। परन्तु मन्दिरनिर्माणकार्यस्य अग्रगतेः सम्भावना नासीत्। अतः ब्रह्मानन्दचरितानुसारं ज्ञायते यत् प्रथमचरणस्य निर्माणं १९०९ तमे वर्षे सम्पूर्तिमगात्।

### स्वामिनः बास-रिलीफ (Bas-Relief) विग्रहः

यद्यपि स्वामिनः प्रादुर्भावस्य अर्धशतके स्मृतिमन्दिरम् आंशिकमात्रमभूत्, तथापि अस्मिन् काले घटीतैका महती चर्चितघटना। सा च विवेकानन्दस्य वास-रिलिफमूर्तिनिर्माणं मन्दिरे स्मृतिमूर्तिस्थापनञ्च। मूर्तिरियं स्वामिविवेकानन्दस्य

---

[६] शतवर्षे दुइ स्मृतिमन्दिर; चन्द्रकान्तानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; २०२४; पृष्ठा - ५१

अमेरिकन्शिष्या श्रीमती वेटीलिगट् इत्यस्याः अर्थसाहाय्येन भगिनीनिवेदितायाः प्रोत्साहेन च निर्मिता। १९१६ तमे वर्षे मूर्तिः मन्दिरस्य पूर्वस्यां भित्तौ भित्तौ स्थायीरूपेण स्थापिता। यद्यपि निवेदिता तां मूर्तिं मनुष्यचक्षुषा द्रष्टुं न शक्तवती।

स्वामिनः विग्रहनिर्माणकाले कलाकारस्य अद्भूतः विचारः उपलभ्यते, यश्च निवेदितायाः पत्रात् प्राप्तः—शिल्पकारः नैवेद्यनिवेदनपुरस्सरं मन्त्रोच्चारणेन च विग्रहशिलाय पूजां समर्प्य प्रार्थयते स्म यत्, 'हे स्वामिन्, मम हस्ते प्रादुर्भवतु।' कार्यं सन्तोषजनकं न भवति चेत्, पारिश्रमिकं न गृह्णामि इत्यपि भणितं शिल्पकारेण।[७]

## मन्दिरनिर्माणे द्वितीयचरणम् (१९१९-१९२३)

१९२३ तमे वर्षे मठस्य मन्दिरस्य द्वौ तलौ भविष्यतः इति अधिकारिभिः कृतनिर्णयः। यत्र ओङ्कारप्रतीकयुक्तवेदी निर्मिता भविष्यति। द्वितलमन्दिरस्योपरि त्रिशूलं स्थास्यतीत्यपि सिद्धान्तः गृहीतः। स्वामिनः शिवस्वरूपत्वं मनसि निधाय त्रिशूलस्थापनस्य निर्णयोऽभवत्।

द्वितीये तले ओङ्कारमन्दिरनिर्माणस्य बहुनि प्रयोजनानि आसन्। तानि च—

प्रथमं, स्वामिविवेकानन्दस्य स्मृतिमन्दिरम् अतीव साधारणं खर्वाकृतिसम्पन्नं लघु च आसीत्। अतः तस्य भव्यरूपप्रदानार्थम् उच्चतावृद्ध्यर्थञ्च द्वितलस्य संरचना आवश्यकी जाता। द्वितीयं, स्वामिनः गर्भमन्दिरस्य छदः उद्घाटितश्चेत् स्वामिनः श्रीमूर्तेः शिरसि जनाः चरिष्यन्ति। तृतीयं, स्वामिनः इच्छानुसारं सार्वभौमिकमन्दिरस्य स्थापना। चतुर्थं, शास्त्रानुसारं नागरशैल्या मन्दिरनिर्माणस्य आवश्यकता।[८]

अनन्तरं १९२३ तमवर्षस्य अन्तिमभागे द्वितलविशिष्टं स्मृतिमन्दिरं पूर्णं

---

[७] उद्बोधनपत्रिका – वर्षः - ८०; पृष्ठा – ५०४-५०५

[८] *शतवर्षे दुइ स्मृतिमन्दिर*; चन्द्रकान्तानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; २०२४; पृष्ठा - ९७

निर्मितम्। यत्र अधः स्वामिविवेकानन्दस्य विग्रहः, उपरितनतले ओङ्कारः, मन्दिरस्य शिखरे त्रिशूलञ्च सुशोभते।

अस्त्यत्र स्मृतिमन्दिरस्य द्वितीयतलस्य निर्माणकाले मन्दिरस्य शिखरमारूह्य को वा भर्मापमिश्रितत्रिशूलं स्थापयेदिति आगतायां समस्यायां विज्ञानानन्दस्वामिपादस्य मुख्यसहायकेन स्वामिशङ्करानन्देन सा समस्या निवारिता। विगतभयः स्वामिशङ्करानन्दः स्वयं शूरवत्तया मन्दिरशिखरमारूह्य त्रिशूलम् अस्थापयत्। इतोऽपि स्वामिशङ्करानन्दस्य दिनलिपितः ज्ञायते यत्, १९२४ तमे वर्षे जानुयारीमासे स्थापितस्य अल्वेस्टारनिर्मितोङ्कारस्य रूपकारः स एव। अस्योङ्कारस्य रूपरेखाम् अङ्कयित्वा स्वयं खिदिरपुरनगरस्य कुटरास्टोन-ओयार्क्स इति संस्थां गत्वा तस्य प्रारूपेण सह एकस्य कलसस्यापि निर्माणार्थम् अवोचत्। सः कलसः ओङ्कारेण सह द्वितले अधुना शोभते।

## मन्दिरनिर्माणे तृतीयचरणम्

स्वामिविवेकानन्दस्मृतिमन्दिरस्य प्रवेशद्वारस्य दक्षिणपार्श्वे ओङ्कारमन्दिरं प्रति गमनार्थं सोपानानि संकीर्णरूपेण ऋजुतया च निर्मितानि आसन्। तानि प्रांशुविशिष्टानि संकीर्णानि इति कारणात् बहुभ्यः नारोचन्त, तेषु म्याकलाउड अन्यतमा। तस्याः कथनमासीत्, 'सोपानानि ऋजु-उच्चतासम्पन्नानि संकीर्णानि। तस्मात् स्वामिनः शिक्षया सह तन्न सङ्गच्छते।'[९] अनन्तरकाले म्याकलाउडमहोदयया अभियन्त्रे गोपालकृष्णसरकाराय सोपानस्य विस्तृतरूपरेखा प्रेषिता। (अलबार्ट इत्येनं महाभागं प्रति म्याकलाउड इत्यनया स्वपत्रे लिखितं, दिनाङ्कः – २६ डिसेम्बरः, १९३५) सा सोपानरूपरेखा इतालीदेशस्य भिल्ला-डि-इस्टि (Villa d' Este) इत्यस्य अनुरूपा।[१०] यद्यपि एतादृशविचारात् बहुकालानन्तरम् आरब्धं नूतनरूपेण

[९] उद्बोधनपत्रिका – वर्षः - ८०; जोसेफिन् म्याकलाउड; पृष्ठा – ३७१
[१०] उद्बोधनपत्रिका – वर्षः - ८०; पृष्ठा – ५००

सोपाननिर्माणकार्यम्। तन्मध्ये भिन्नमेकं कार्यम् आपततिम्। प्रथमस्तम्भः स्वामिविवेकानन्दस्मृतिमन्दिररक्षणे असमर्थत्वात् १९३८ तमवर्षस्य अन्तिमे मन्दिरस्य समीपे अन्यः गहनस्तम्भः निर्मितः। इतःपरं १९५६ तमे वर्षे सेप्टेम्बरमासे पुरातनसोपानस्थाने नूतनसोपाननिर्माणं भवेदिति सिद्धान्तः गृहीतः। तदा समग्रव्यायभारम् ऊढवान् अमेरिकानिवासी भक्तः ग्लेन-ओवारटन्महाभागः।

नवीनसोपानस्य निर्माणकाले पर्यवेक्षणदायित्वमासीत् स्वामिशिवानन्दस्य मन्त्रशिष्ये स्वामिमहावीरानन्दे। समाप्ते सोपानकार्ये १९५७ तमवर्षस्य जानुयारीमासस्य १९ दिनाङ्के शनिवासरे प्रातःकाले स्वामिविवेकानन्दस्मृतिमन्दिरस्य नवीनचन्द्राकृतिसोपानस्य उद्घाटनसमारोहे दलाइलामा, पाञ्चेनलामा च बेलुडमठम् आगतौ। पश्चात् एकदा ग्लेन-ओवारटनमहोदयोऽपि मठमागत्य भव्यं नूतनञ्च सोपानमवलोक्य आनन्दितस्सन् पदसञ्चालनेन परितः निरैक्षत। अपि च १९९० तमे वर्षे मन्दिरस्य उपरितनतले लौहस्तवरकाणां स्थापनेन महत्परिवर्तनं सञ्जातम्। तेन सह सम्पूर्णमन्दिरस्य विवेकानन्दविग्रहस्य च संस्करणं साधितम्।

**विशेषः**

१९२९ तमे वर्षे स्वामिविवेकानन्दस्य जन्ममहोत्सवे वीरः देशभक्तः नेताजी सुभाषचन्द्रः सभापतिभाषणे स्वामिणः तेजपूर्णम् आदर्शजीवनं ओजपूर्णकृतित्वञ्च हृदि निधाय उदघोषयत् 'स्वामिपादस्तु प्रकाण्डः हीरकः, यस्य उज्ज्वलज्योतिः परितः विकीर्यते। यस्य यादृशी इच्छा तथा गृह्णीयात् ज्ञायेत च।'[११] दृश्यते च स्वामिनः स्मृतिमन्दिरस्य निर्माणकालेऽपि गुरुभ्रातरः, पाश्चात्त्यानुरागिणः शिष्याश्च समानमार्गमनुसृत्य स्वामिविवकानन्दवचनस्य मुख्यभावानुसारं मन्दिरनिर्माणे प्रयासं चक्रुः।

[११]*स्वामि शिवानन्दके येरूप देखियाछि*; चेतनानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; २०१६; पृष्ठा - ३१९

कालेन स्वामिविवेकानन्दस्मृतिमन्दिरस्य छदः ओङ्कारस्य गर्भमन्दिररूपेण समायातः। यस्य पुरतः शोभते नागररीत्यानुसारेण निर्मितं अर्धचन्द्राकृतिविशिष्टं सोपानम्। मन्दिरशिखरे विराजते त्रिशूलम्।

स्वामिचन्द्रकान्तमहाराजस्य अमृततुल्यभावनानुसारं—स्मृतिमन्दिरस्य नातिदूरे एव श्रीश्रीमातुः मन्दिरं यत्र मठभूमितः किञ्चिदुपरि पूर्वाभिमुखिनी माता उपविष्टा अस्ति। स्वामिपादस्तु स्मृतिमन्दिरस्य प्रथमतले पश्चिमाभिमुखस्सन् मठभूम्यपेक्षया किञ्चिदधः विराजमानः वर्तते। स्वामिविवेकानन्दः जगज्जनन्याः कृपासु यथा जीवनम् अयापयत् तथैव अधुनाऽपि मातरि प्रेमपूर्णदृष्टिं संस्थाप्य स्मृतिमन्दिरे उपविष्टः, तथैव माताऽपि स्नेहपूर्णचक्षुषा स्वतनयं नरेणं पश्यन्ती अस्ति। एतदेव अस्य स्मृतिमन्दिरस्य अन्यतमं प्रशंसार्हं वैशिष्ट्यमिति शम्।



[बेलुडमठे स्वामिविवेकानन्दमन्दिरस्य पुरोभागस्य चित्रम्]

# विवेकानन्दस्वामिपादानां स्मृतिमन्दिरस्य स्थापत्यम्

शुभदीपदासः*

अनु महासमाधि प्रेष्ठबिल्वतरोः अन्तिके अधिसमाधिमञ्चं विवेकानन्दस्वामिपादानां स्मृतिकक्षः विनिर्ममे। प्रथमपर्याये अर्थाभावात् कक्षाद्बहिः परिक्रमणाध्वनि अङ्गसज्जा नैव समाप्तिं गता। पुण्यतोया मन्दाकिनी नित्यं मन्दिरं स्पृशन्ती तस्य क्षयसम्भावनाम् अवर्धयत। परं विंशत्यधिकोनविंशतितमे ईशवीयाब्दे पुनः स्मृतिमन्दिरनिर्माणकार्यं समारभ्यत। तदर्थं च स्वामिविज्ञानानन्दः वेलुडमठं समाययौ। श्रीरामकृष्णमन्दिरस्थापत्यवैशिष्ट्यानि स्वामिपरिकल्पितानि मनसि निधायैव तेन स्वामिनां स्मृतिमन्दिरस्य निर्माणे प्रवृत्तम्। अतः सर्वधर्मसमन्वयभावना अत्रापि मन्दिरे प्रकटिता। स्मृतिमन्दिरम् इदं पश्चिमाभिमुखम्। तस्य पूर्वस्यां पुण्यसलिला गङ्गा, उत्तरस्याम् ऐतिहासिकं देवदारुवृक्षत्रयं, ततः उत्तरस्यां मातृमन्दिरं राखालमहाराजमन्दिरं च, उत्तरपश्चिमदिशि श्रीरामकृष्णमन्दिरम्।

## प्रथमतलम्

गर्भगृहम् एव मन्दिरस्य प्राणभूतम्। उत्तरभारतीयनागररीतिस्थापत्यानुगुणं गर्भगृहं सदैव उन्नतभूमौ भवति, सोपानानि च यथापेक्षितानि निर्मीयन्ते। श्रीरामकृष्णमन्दिरेऽपि तथैव दृश्यते। स्वामिनां स्मृतिमन्दिरे तु एतद्विरुद्धमेव परिलक्ष्यते। अयं च दोषः गुणत्वेन परिणमितः स्वामिविज्ञानान्देन। स्वामिनां

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

गर्भमन्दिरम् (भूमेरपि) अधस्तात् विद्यमानम्। मातृमन्दिरे जगज्जननी सारदा पूर्वास्या तदुन्नतभूमौ राजमाना, स्वामी च पश्चिमास्यः कृपाकाङ्क्षया तामवलोकयति इति अत्र विशेषः। अस्मिन्प्रथमतले स्वामिनां रिलिफ्-मूर्तिसमन्वितं वर्गाकारं गर्भमन्दिरम्। भित्तिपार्श्वे सितप्रस्तरवेदिका- स्वामिनां पाञ्चभौतिकदेहसंस्कारस्थानम्। मन्दिरस्य उपरिभागः अर्धचन्द्राकृतिः। उभयत्र च वातायनद्वयम्। मूलमन्दिरस्य संरक्षणार्थं परितः भित्तयः। अनेन सङ्कीर्णमेकं नाटमन्दिरं परिक्रमणमार्गश्च सृष्टे। प्रथमतलम् एतत् तथा दृष्टिनन्दनं नास्ति।

## द्वितीयतलम्

द्वितीयतले ओङ्कारमन्दिरम्। स्वामिचरणानां चिन्तनम् अत्र मन्दिरे प्रतिविम्बते। अतः अस्य न केवलं मन्दिरत्वं चिन्त्यम्। "हिन्दुधर्मे नैकेषु सम्प्रदायभेदेषु सत्स्वपि ओङ्कारो हि सर्वेषामुपास्यः। अतः सार्वजनीनम् ओङ्कारमन्दिरम् एकं निर्मेयम्" इति तदभिलाषः प्रकृते वास्तवायितः। ओङ्कारः सर्वधर्मसमन्वयप्रतीकस्वरूपः। ओङ्कारे हि जगति विद्यमानानां समेषां धर्माणां समन्वयः शक्यसम्भवः। अतः स्वामिस्मृतिमन्दिरस्य द्वितीयतलमेव ओङ्कारमन्दिरस्य गर्भगृहं सञ्जातम्। मन्दिरस्य पुरतः सोपानानि। ओङ्कारमन्दिरस्य गर्भगृहं स्वामिगर्भगृहसमपरिमाणम्। वेदिकाया उपरि सितपादपीठस्थे सितकलसे प्रस्फुटितं श्वेतशतदलं, तदुपरि ओङ्कारश्च। गृहस्य भित्तौ अष्टौ प्रतिमास्थानानि सन्ति। स्वामिमन्दिरापेक्षया ओङ्कारमन्दिरम् असङ्कीर्णम्। चत्वारि द्वाराणि ओङ्कारादिचिह्नोपेतानि अखिलविश्ववासिनः आह्वयन्ति। ओङ्कारगृहस्य उपरिभागः शून्यः गोलाकारश्च तृतीयस्तरे चूडायां पर्यवस्यति। "विवेकानन्दः घनीभूतभारतवर्षस्वरूपः, तस्य मन्दिरं च भारतवर्षस्य भावसत्तायाः प्रतीकभूतम्" इति भगिनी निवेदिता मन्यते। अतः ओङ्कारमन्दिरोपेतं स्वामिनाम् इदं स्मृतिमन्दिरं विश्वजनीनम् (Universal) अभूत्। अस्य ओङ्कारमन्दिरस्य प्रतिष्ठायां हि चत्वारि कारणानि—

१. स्वामिमन्दिरस्य अल्पकायत्वात् तस्य सौधत्वेन परिणामाय उत्तुङ्गता अपेक्षिता।

२. गर्भगृहस्य उपरिभागे रिक्ते सति स्वामिनां श्रीमूर्तेः उपरि सर्वेषां गमनागमनं स्यात्। तदनभिप्रेतम्।

३. स्वामिनां सर्वजनीनभावस्य वास्तवायनम्।

४. शास्त्रीयनागरशैल्या मन्दिरनिर्माणे अस्य उपयोगः।

## तृतीयतलम्

मन्दिरस्य तृतीयतलं चूडांशभूतमपि मन्दिराकारत्वात् क्षुद्रमन्दिरमिव प्रतिभाति। वस्तुतस्तु ओङ्कारमन्दिरस्य उपरिभागः प्यारापेटभित्त्या समावृतः, अस्य आशाचतुष्टये चूडाचतुष्टयम्। एतद्विहाय क्षुद्रचूडाचतुष्टयं क्षुद्राकृति-प्यारापेटभित्तिश्च मध्यवर्तिनीम् अन्तःशून्यां मन्दिराकृतिं समावृत्य वर्तते। सर्वदिक्षु वायुगमनागमनविवराणि सन्ति। दक्षिणेश्वरभवतारिणीमन्दिरमिव सर्वतः विद्यमानं वृत्तखण्डाकृतित्रयं मन्दिरस्य शोभां वर्धयति। मध्ये च बृहदाकारायां प्रधानचूडायाम् आमलक-कलस-प्रस्फुटितकमलानि, तदुपरि नयनसमाकर्षकं धातुजत्रिशूलं स्वामिनां शिवस्वरूपं द्योतयति।

अत्र मन्दिरे वङ्गप्रदेशे समुपलभ्यमानानां चाला-दालान-रत्न-आख्यानां त्रिविधमन्दिरशैलीनां समावेशः समुपलभ्यते। ओङ्कारमन्दिरस्य समतलोपरिभागेन दालानमन्दिरत्वं, मध्ये मन्दिराकृतिशिखरे चालाकृत्या चालामन्दिरत्वं, पर्यायत्रये चूडात्रयेण नवरत्नमन्दिरत्वं च अस्य स्फुटीभवति। एवं विवेकानन्दस्वामिपादानाम् इदं स्मृतिमन्दिरम् तस्य समन्वयचिन्तनस्यैव निदर्शनभूतम् इति निःसङ्कोचं वक्तुं शक्यम् इति शिवम्।

# ब्रह्मानन्दस्वामिनः स्मृतिमन्दिरम्

राजेश-अधिकारी*

## भूमिका

श्रीरामकृष्णपरमहंसस्य शिष्येषु विवेकानन्दयतिचरणानन्तरं समादृतानां धृतनरकलेवराणां राजा-महाराजाभिधानां रामकृष्णसङ्घस्य अध्यक्षप्रथमानां ब्रह्मानन्दस्वामिनां स्मृतिमन्दिरं विराजते बेलुडमठान्तर्वर्तिनः रामकृष्णमन्दिरस्य पूर्वस्यां दिशि, सारदामातुः मन्दिरस्य च उत्तरस्यां दिशि गङ्गायाः कूले। स्वामिब्रह्मानन्दो हि श्रीरामकृष्णस्य मानसपुत्रः, त्यागिश्रेष्ठः न्यासी। विवेकानन्देन श्रद्धयोद्घोषितम्—"There is a dynamo working and we are all under him"[1] इति। सङ्घाध्यक्षरूपेण सङ्घस्य परिरक्षणम्, सङ्घान्तर्भुक्तानां ब्रह्मचारिणां जीवनसरणिनिर्माणम्, सङ्घस्य शाखानिर्माणम्, भक्तहृदयेषु रामकृष्णभावस्य अभिव्याप्तिः, समाजस्य राष्ट्रस्य च निर्मितिः इत्येतत् सर्वं महत्या धिया, सावधानेन च चकार स स्वामी। सङ्घकार्यनिष्ठस्य तस्य वृन्दावनादितीर्थाटनेन स्वीयाध्यात्मोन्नतिः अपि लघुतरा इव अभासत। ब्रह्मानन्दस्वामिनां प्रदर्शितेयं परम्परा अद्यापि अनुवर्तते रामकृष्णसङ्घे, यतीन् उद्दिश्य यथोक्तं तेनैव—"वयं सम्प्रदायं निर्मितवन्तः, यूयम् अनुवर्तध्वम्"[2] इति।

## महासमाधिः

द्वाविंशत्युत्तरोनविंशशततमे ईशवीयाब्दस्य द्वाविंशतितमे (२२.०३.१९२२)

---

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

[1] *स्वामी ब्रह्मानन्दः*, उद्बोधनकार्यालयः, फाल्गुनः, १४३८, पृ. १८०

[2] आमरा tradition गड़े दिलाम, तोरा दागा बुलिये या (*देवलोकेर कथा*, स्वामी निर्वाणानन्दः, उद्बोधनकार्यालयः, १९९७, पृ. १६४)

अहनि बेलुडमठात् बलराममन्दिरं प्रति यात्रां चकार सः। एतदवसरे तस्य शरीरे आदौ विसूचिकारोगः, तदनु बहुमूत्ररोगः परिलक्षितः, वैद्यानां पौनःपुन्येन सेवयापि स्वास्थ्योन्नतिः न अदृश्यत, परन्तु हास्यरसस्निग्धवदनेन निरन्तरम् अध्यात्मोपदेशस्य व्याघातो नासीत्। अथ एप्रिल्-मासस्य अष्टमस्य अह्नः इयं दृश्यम्। सायं तेन स्वीया अवस्था अवर्ण्यत इत्थम्—सहनं सर्वदुःखानाम् अप्रतीकारपूर्वकम्—इत्येषा मदीया अवस्था साम्प्रतम् इति। हठादेव तदीयवदनस्य औज्ज्वल्यम् अवर्धत, दिव्यभावतां प्राप्य समाहितः जातः सः। उपस्थितानां अनुपस्थिनां च कल्याणं कामयता तेन ब्रह्मणः सत्यता, जगतश्च मिथ्यात्वम् उपदिष्टं समेभ्यः। तदा तस्य उदीरितैषा—आहा-हा, ब्रह्मसमुद्रः, ओम् परब्रह्मणे नमः, ओम् परमात्मने नमः, विश्वासस्य पत्रे भासमानोऽहम्, आहा-हा इति वाक् समेषां हृदयं करुणया पस्पर्श। एवंरूपेण असारमिमं संसारं परित्यज्य ध्याननिमग्नः महापुरुषः ब्रह्मणा सह अभिन्नः जातः।

## अनु महासमाधि

महासमाधेः परस्मिन् दिने (११.०३.१९२२) प्रातः सार्धपञ्चवादने शोभायात्रया सह नवीनशय्योपरि शायितः पीतकौशेयवस्त्रपरिहितः गन्धपुष्पादिसुशोभितः महाराजस्य भौतिकदेहः बलराममन्दिरात् वराहनगरं प्रति आनीतः, ततश्च बेलुडमठं प्रति नावा समानीतः। शङ्करानन्दस्वामी नौकायाः क्षेपणीं स्वहस्ते गृहीत्वा सन्तर्पणेन सह महाराजस्य देहं बेलुडमठस्य कूले आनीतवान्, तत्कूलाच्च द्वादशभिः सन्न्यासिभिः श्रीगुरुमहाराजस्य जयोद्घोषेण सह भौतिकदेहः ऊढ्वा मठस्य प्राचीनाम्रवृक्षस्य अधः संस्थापितः। तदनु महाराजाः, भक्ताश्च यतिवराणां चन्दनचर्चितं पुष्पमाल्यादिविभूषितं चरणयुगलं संस्पर्श्य वेदोद्घोषम्, रामनामसङ्कीर्तनं च सम्पादितवन्तः। अनन्तरं ब्रह्मानन्दस्वामिनां वर्तमानमन्दिरं यत्र विराजते, तत्रैव चन्दनकाष्ठविनिर्मिता चिता विरचिता, शेषकृत्यादिकं समाप्य च महाराजस्य जयध्वनिना सह

वैदिकमन्त्रोद्घोषपुरःसरं चितायाम् अग्निसंयोगः कृतः। अन्ते च उपविष्टस्य शोकप्लावितस्य जनसमूहस्य विस्मयोत्पादनपुरःसरं चिताभस्मादिकं सर्वं निमेषादेव माता भागीरथी एव स्वीयवारिराशिप्लावनेन प्रक्षालितवती, गङ्गायां च सर्वं विलीनं सञ्जातम्।

## स्मृतिपूजा

ब्रह्मानन्दस्वामिमहाराजस्य महाप्रयाणात् परं त्रयोदशतमे दिवसे वैशाखमासस्य नवम्यां तिथौ शनैश्चरवासरे महासमाधिम् उपलक्ष्य बेलुडमठे आयोजिते स्मृतिपूजनानुष्ठाने समेषां भक्तानां आमन्त्रणम् अभवत्, यत्र प्रायः द्विसहस्रं भक्ताः प्रसादं प्रापुः। सारदानन्दस्वामिना तस्मात् तदीयायां दिनपञ्जिकायां विलिखितम्—"Special pooja day on account of S.B's occasion. Over 2000 fed". इति। तदनन्तरं महाराजस्य लीलाः स्मरणपटे नित्यसञ्जागरणकामनया बहुत्र स्मरणसभाः समायोजिताः, तत्रादौ वसिरहाटाख्ये नगरे १५.०५.१९२२ तमे दिनाङ्के शिवानन्दस्वामिनः सभापतित्वे स्मृतिसभा सम्पन्ना, ततः २८.०५.१९२२ तमे दिनाङ्के ब्रह्मानन्दस्वामिनः पूर्वाश्रमे शिकड़ाकुलीनग्रामे स्मृतिसभा बभूव, घोषवंशस्य दूर्गाट्टलिकायां आयोजितायामस्यां स्मृतिसभायां महाराजस्य दीक्षिताः शिष्याः प्रबोधचन्द्रघोषः, नेपालचन्द्रघोषः, पञ्चाननघोषः चेत्यादयः समुपस्थिताः आसन्। अस्याः सभायाः नाम आसीत् रामकृष्णविवेकानन्दमहोत्सवः इति।

## मन्दिरस्य स्थाननिश्चयः निर्माणकार्यं मन्दिरप्रतिष्ठापनं च

रामकृष्णलोकं सम्प्राप्ते ब्रह्मानन्दस्वामिनि, तस्य पूतदेहः बलराममन्दिरात् बेलुडमठं प्रति आनयनकाले एव महापुरुषमहाराजः प्रवीणैः सह आलोच्य ब्रह्मानन्दस्वामिनः समाधिस्थानविषये निश्चयमकार्षीत्। यत्र महाराजस्य पूतदेहे अग्निसंयोगो विहितः, तत्रैव तन्मन्दिरनिर्माणस्य प्रस्तावः सञ्जातः। प्रस्तावानुसारम् असमानं जङ्गलाकीर्णं तत् स्थानं समीकृत्य २३.१२.१९२२

तमे दिनाङ्के मन्दिरस्य भित्तिपूजनं कृतम्, महापुरुषमहाराजेन च शिलान्यासः कृतः। मन्दिरस्य सर्वमपि दायभारं शङ्करानन्दस्वामिमहाराजाः ऊढवन्तः। श्रीरामकृष्णस्य गृही भक्तस्तथा ब्रह्मानन्दस्वामिनः स्नेहभाजनम् आश्रितश्च श्यामसुन्दरघोषः मन्दिरनिर्माणाय चत्वारिंशत्सहस्रं रूप्यकाणि अददात्। एवंरूपेण प्रायः चतुर्दशमासव्यापिकार्यं सञ्जातम्, अनन्तरं ब्रह्मानन्दस्वामिनः जन्मतिथौ ०७.०२.१९२४ तमे दिनाङ्के मन्दिरस्य प्रतिष्ठापनम् अभूत्। तस्मिन् दिवसे वेदोद्घोष-गीत-यज्ञ-पूजन-कीर्तन-नारायणसेवादिपूरःसरं महापुरुषमहाराजेन सर्वेषां नयनयुगलयोः ह्लादजननपुरःसरं ब्रह्मानन्दमन्दिरस्य दिव्यं भव्यं च द्वारोद्घाटनम् अकरोत्। स्वामी सारदानन्दः, स्वामी शङ्करानन्दः, अन्येऽपि यतिवराः अस्मिन् दिव्यपावनकर्मणि उपस्थिताः आसन्। तस्मिन्नहनि प्रायः सार्धद्विसहस्रं भक्ताः प्रसादं लब्धवन्तः, सूर्योदयात् पूजारम्भः, आदिनं भजनम्, ब्रह्मानन्दप्रवर्तितं रामनामसङ्कीर्तनम्, रात्रौ त्रिवादनपर्यन्तं कालीपूजनं चेत्यादीनां दिव्यकर्मणां साक्षी अभूत् मठप्रदेशः।

## मन्दिरस्य स्थापत्यम्, अवस्थानगतवैशिष्ट्यं च

ब्रह्मानन्दस्मृतिमन्दिरस्य स्थाननिर्वाचनम्, निर्माणकौशलम्, द्वारोद्घाटनमित्यादिषु शिवानन्दसारदानन्दादीनां गुरभ्रातृणाम् आध्यक्ष्यत्वात्, महाराजस्यैव शिष्यसेवकादिभिः उपदिष्टत्वाच्च सर्वत्रैव ब्रह्मानन्दस्वामिनां स्वरूपम्, चारित्र्यमाधुर्यं च प्रकाशितम्। सर्वेषां मते श्रीरामकृष्णस्य मानसपुत्रत्वात्, ब्रह्मानन्दस्वामिसन्दर्शनेनैव श्रीरामकृष्णस्य प्रतिबिम्ब-प्रतिभासत्वाच्च रामकृष्णमन्दिरस्य गर्भमन्दिरवदेव ब्रह्मानन्दमन्दिरस्य निर्माणं सञ्जातम्। मन्दिरमिदं दैर्घ्यप्रस्थयोः ३२ फिट्, ६ इञ्चिपरिमितम्, उच्चतायां च ३५ फिट्-मितम्। पुष्पदलपरिवेष्टितासनेन सह श्वेताश्मना विनिर्मितं गर्भमन्दिरं दैर्घ्यप्रस्थयोः प्रायः २३ फिट्-मितम्, तत्रैव पश्चिमास्यरूपेण महाराजस्य दिव्यविग्रहः प्रतिष्ठापितः। श्रीकृष्णस्य परमभक्तत्वात् तद्विग्रहेण

सह बालगोपालकस्यापि मूर्तिः संस्थापिता वर्तते। मन्दिरस्य द्वितले महाराजस्य शयनकक्षा वर्तते, तत्रैव महाराजेन व्यवहृतं शय्यादिकं सङ्गृहीतं वर्तते। पुनश्च, मन्दिरप्रदक्षिणमार्गस्य उत्तरपूर्वकोणतः दक्षिणेश्वरतीर्थस्य दर्शनं भवति, मठस्य निर्दिष्टादेकस्मात् स्थानात् श्रीरामकृष्णस्य ब्रह्मानन्दस्वामिनः च विग्रहावपि द्रष्टुं शक्येते, पुरतो वर्तमानौ वंशीवटकदम्बवृक्षौ च बालकैः सह बालगोपालकस्य लीलाक्षेत्रवत् प्रतिभासेते, तेनापि उभयोः दिव्यपुरुषयोः दिव्यभावसूत्रेण बन्धनमिव प्रतीयते।

## महाराजस्य पूजनम्

महासमाधेः परं १९.०१.१९२२ तमे दिनाङ्के महाराजस्य जन्मतिथिपूजनं भजनादिना रात्रौ कालीपूजनेन च सह प्राथम्येन समारब्धम्। मठस्य उत्तरपूर्वदिशि यत्र महाराजस्य व्यवहृतं वस्तुजातं संरक्षितमस्ति, तत्र नित्यपूजा समारब्धा। तदनु ब्रह्मानन्दमन्दिरप्रतिष्ठायाः परं तत्रैव द्वितले सर्वं वस्तुजातं समानीय प्रथमपूजकेन श्रीशानन्दस्वामिना नित्यपूजनं समारब्धम्। साम्प्रतं प्रतिदिनमेव ब्रह्मानन्दस्वामिने दशोपचारेण सह पूजनं शयनादिकं च प्रदीयते, बालगोपालकस्यापि पञ्चोपचारेण पूजनं भवति। जन्माष्टम्याम्, रासपूर्णिमायां च त्रिषु दिवसेषु सायं बालगोपालकस्य विशेषभोगरागादिकं भवति। महाराजस्य जन्मतिथौ मन्दिरस्य पूरतः वेदपाठः, भजनं च क्रियते साधुभिः ब्रह्मचारिभिश्च। तस्यां तिथौ प्रातः पञ्चवादने शयनकक्षायां प्रातराशः, नववादने गोपाल-गाप्पा, मोगलाइ-चायं च महाराजाय निवेद्यते, मध्याह्ने, रात्रावपि श्रीरामकृष्णस्य प्रसादरूपेण भोगो निवेद्यते महाराजस्य शयनकक्षायाम्। प्रातः आरभ्य तस्य बालगोपालकस्य च षोडशोपचारपूजा भवति, सायं महाराजस्य आरतिः, रामनामसङ्कीर्तनम्, श्यामनामभजनम्, विशेषगीतानि च क्रियन्ते।

## उपसंहारः

एतावता स्वामिनः ब्रह्मानन्दस्य स्मृतिमन्दिरप्रतिष्ठापनस्य सर्वेऽपि क्रमा

विस्तारेण समुल्लिखिताः। श्रीरामकृष्णस्य मानसपुत्राणां ब्रह्मानन्दस्वामिनां महाप्रयाणात् परं दिक्षु अध्यात्मशक्तेः महान् विस्तारः सञ्जातः। यथोच्यते अनन्तरं सङ्घाध्यक्षेण महापुरुषमहाराजेन—**महाराजस्यैवायं मठः, के वयम्? विवेकानन्दस्वामिना प्रतिष्ठितस्य मठस्योन्नत्यै तेन महान् प्रयासो विहितः। प्रत्येकम् इष्टिकायां महाराजस्य स्मृतिः संल्लिप्ता। स एव स्ववक्षःस्थलोहितं वारीकृत्य एतत् सर्वं कृतवान्, इदानीमपि कुर्वन्नस्ति। अहं तु तस्य भृत्य एव, तत्पादुके शिरसि विधाय उपविष्टोऽस्मि। रामचन्द्रस्य पादुके शिरसा संस्थाप्य यथा भरतः राज्यशासनम् अकरोत्, अहमपि तथैव महाराजस्य पादुके शिरसि संस्थाप्य कार्यं करोमि। सः यथा बुद्धिं प्रददाति, तथैव करोमि**[३]। इति। राजामहाराजस्य स्मृतिः अस्मासु चिराय स्यात्, तल्लीलाकीर्तनेन तदीयभक्तिवारिणा च वयं सदा कृतार्थाः स्याम इति शिवम्।

---

[३] शिवानन्दवाणी, द्वितीयभागः, पृष्ठम् - ६५

# श्रीरामकृष्णमानसपुत्रस्य स्मृतिमन्दिरसन्दर्भे

विश्वरूपवेजः*

## भूमिका

श्रीरामकृष्णस्य मानसपुत्रः—राखालः, स्वामिविवेकानन्दस्य स्नेहभाग् भ्राता—राजा, गुरुभ्रातॄणां शिष्याणाञ्च प्रियतमः—महाराजः, विपुलश्रीरामकृष्णसङ्घस्य प्रथमाध्यक्षः इत्यादयः नानाविधोपाधिसमन्वितेऽपि परमहंसाचार्यः ब्रह्मानन्दः, कृष्णसखा ब्रह्मानन्दः इति स्वस्वरूपविशिष्टः महापुरुषः त्रितापतप्तानां सांसारिकाणामुद्धारार्थं जगद्धिताय अगणितशिष्यान् मार्गदर्शनाय च १८६३ खीष्टाब्दस्य जानुयारीमासस्य २१ दिनाङ्के पूण्यलग्ने मनुष्यरूपधारणेन धरायामवतीर्णोऽभूत्।

एकदा श्रीरामकृष्णः जगदम्बामुद्दिश्य शुद्धाभक्तिसमन्वितपुत्रमेकमयाचत्। परन्तु यदा माता एकं सौम्यपुत्रं तत्क्रोडे उपावेश्य आह 'एषः तव पुत्रः', तदा आजन्मब्रह्मचारिणः पुत्रः कथमिति चिन्तयन् चकितः जातः। प्रथमतया राखालचन्द्रघोषेण सह श्रीरामकृष्णस्य मेलनेन मातृप्रदत्तपुत्रेण सह साम्यं दृष्ट्वा 'भयं मास्तु, एषस्तव मानसपुत्रः' इति जगदम्बायाः आश्वस्तवचनमपि अस्मरत्। ततः 'एषः स एव कमलदले नृत्यपरायणः नूपुरपरिहितः श्रीकृष्णकरधृतः कृष्णसखा, यमहं स्वप्ने अपश्यमि'ति प्रत्यभिज्ञापि उदिता। अतः श्रीरामकृष्णः निगदति स्म यत् 'राखालः स्वस्वरूपं ज्ञास्यति चेत् तस्य शरीरं न स्थास्यति।'[१]

## स्वामिब्रह्मानन्दस्य महासमाधिः

स्वामिब्रह्मानन्दः बलराममहाशयस्य गृहे सहसा विसूचिकारोगेण अस्वस्थः

---

* संस्कृतभाषाशिक्षकः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य, नवदेहल्याः।

१ *ब्रह्मानन्दचरित*; प्रभानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; १९९५, पृष्ठा - ३१४

जातः। तदुपशमं विनैव बहुमूत्ररोगस्य प्रकोपबृद्धिरप्यभवत्। औषधेन आरोग्यलाभाभावात् सः वैद्यं प्रति उपदिशन्नाह 'शिव एव सत्यं, औषधं मिथ्या' इति। तस्य स्वस्वरूपस्य स्मरणं विनैव स अपश्यत् यत्, सः ब्रजगोपालेन सह नूपुरं धृत्वा शतदलोपरि नृत्यरतोऽस्ति। तदनन्तरं तस्य गमनवेलायाः सूचनां प्रयच्छन् भगवन्नामोच्चारणेन समाधिलीनः सन् पाञ्चभौतिकशरीरम् अत्यजत्। स्वधामगमनवेलायामपि यः 'ब्रह्म सत्यं जगन्मिथ्या' इति उपदिशन्नासीत्, तस्य तल्लीनत्वोक्ते नास्त्यत्युक्तिः। यथा जलाशये पूर्णिमायां प्रज्ज्वलितचन्द्रस्य प्रतविम्बं दृष्ट्वा पुलकितमत्स्याः तेन सह क्रिडासक्ताः सन्तः 'चन्द्रः अस्मदीयः' इति भ्रान्त्या भ्रान्ताः प्रतिविम्बापगते शोकग्रस्थाः भवन्ति, तथैव राजामहाराजं कृष्णसखं ब्रजगोपालम् 'अस्मदीयः महाराजः' इति भ्रान्त्या नरत्वेन स्वीकृत्य तस्य स्थूलशरीरत्यागे सम्पूर्णश्रीरामकृष्णसङ्घः शोकविगलितोऽभवत्।

सारदानन्दस्वामिपादनये—'ठाकुरेण सह तदनुरूपपूतसङ्गः न केनापि कृतः।'[२] श्रीरामकृष्णः यान् ईश्वरकोटित्वेन असूचयत् तन्मध्ये उल्लेखयोग्यः आसीत् स्वामिब्रह्मानन्दः। तस्य आध्यात्मिकतासन्दर्भे श्रद्धाविगलितः स्वामिविवेकानन्दः अवोचत्—'राज्ञः आध्यात्मिकतायाः अवधिः न प्राप्यते।'[३] श्रीरामकृष्णेन ब्रह्मानन्दस्वामिपादस्य बुद्धेः प्रशंसासन्दर्भे उक्तं- 'राखालस्य राजबुद्धिः, स एकं प्रकाण्डं राज्यं चालयितुं शक्नोति।'[४] परं यदा ब्रह्मानन्दहस्ते श्रीरामकृष्णमिशन्-इत्यस्य कार्यभारः आगतः, तदा अत्यन्तनिपुणतया सुचारुरूपेण च सः श्रीरामकृष्णसङ्घं पर्यचालयत्। बहुविघ्नेभ्यः श्रीरामकृष्णसङ्घं रक्षयित्वा, सततप्रयत्नेन बहुषु स्थानेषु सङ्घस्यास्य शाखोद्घाटनेन बहुविधसेवामूलककार्यैश्च श्रीवृद्धये सफलोऽभूत्।

---

२ *ब्रह्मानन्दचरित*; प्रभानन्दः, स्वामी, उद्बोधनकार्यालयः, कलकाता; १९९५, पृष्ठा - २५

३ *राजा महाराज (स्वामी ब्रह्मानन्द)*; नरोत्तमानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; १९८५-८६, पृष्ठा – ८३-८४

४ *राजा महाराज (स्वामी ब्रह्मानन्द)*; नरोत्तमानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; १९८५-८६, पृष्ठा - १८०

१९२२ ख्रीष्टाब्दस्य एप्रिलमासस्य १० दिनाङ्के रात्रौ पञ्चचत्वारिंशदधिक-अष्टवादने नरलीलां समाप्य स्वधामनि अभ्यगात्। श्रीरामकृष्णसङ्घे राजामहाराजस्य अमूल्यावदानं संस्मृत्य, तद्व्यातिरेके श्रीरामकृष्णसङ्घे अमोघशून्यताञ्चानुभूय, बेलुडमठे आंशिकरूपेण तदभावपूरणाय महापुरुषमहारजस्य हृदये ब्रह्मानन्दस्मृतिमन्दिरनिर्माणस्य इच्छा बलवती जाता, फलस्वरूपेण तेन अस्य स्मृतिमन्दिरस्य शिलान्यासं कृत्वा स्वामिशङ्करानन्दस्कन्धे प्रधानदायित्वमर्पयत्।

## स्थाननिर्वाचनम्

महाराजस्य देहात्यागानन्तरं तस्य पूतदेहः बलराममन्दिरात् बेलुडमठं प्रति आनीतः। तदैव प्रवीणैः सह महापुरुषमहाराजः ब्रह्मानन्दस्मृतिमन्दिरस्य परिकल्पनां विधाय समाधिस्थानस्य निर्णयञ्चकार इति स्वामि-अपूर्वानन्दस्मृतिचारणेन ज्ञायते। पादपप्रियः राजामहाराजः स्वहस्तेन बेलुडमठे गङ्गातीरे नानाविधपादपान् आनीय रोपयित्वा उद्यानमरचयत्। तदारोपितकदम्बवृक्षस्य पार्श्वस्थलमेव तस्य समाधिस्थलरूपेण चितम्। तत्रैव महाराजस्य पूतदेहः अग्नौ समर्पितः।

## कार्यारम्भः

बहुनां स्मृतिचारणात् ज्ञायते यत्, उद्यानप्रियः महाराजः तस्मिन् स्थले नित्यम् अटति स्म। अतः ब्रह्मानन्दस्वामिपादस्य बहुस्मृतिमुग्धं तत्स्थलमेव तस्य समाधिमन्दिरनिर्माणाय गृहीतम्। म्याकलाउडमहदयेन लिखितात् पत्रात् ज्ञायते यत्, महाराजस्य अन्त्येष्टीक्रियासमापनदिने प्रायः द्विसहस्राधिकजनेभ्यः प्रसादवितरणं कृतमासीत्। शिष्याः भक्ताश्च दशसहस्रपरिमितं धनं गङ्गायाः तटबन्धनाय किञ्च स्वामिब्रह्मानन्दस्य स्मृतिमन्दिरनिर्माणाय पञ्चाशत्सहस्रपरिमितं धनम् अयच्छन्। श्रीरामकृष्णाश्रितनवगोपालघोषस्य तृतीयपुत्रः श्यामसुन्दरघोषः स्वामिब्रह्मानन्दस्य विशेषस्नेहभागासीत्।

राजामहाराजस्य जीवद्दशायां तस्य सेवार्थे स्वार्थव्यये त्रूटिं नाचरत्। महाराजस्य देहत्यागानन्तरं तस्य स्मृतिमन्दिरनिर्माणाय गोपनेन ४०,००० रूप्यकाणि अयच्छत्।[५] तस्य मात्रादेशः आसीत् यत्, दक्षिणहस्तेन कृतदानस्य विषये वामहस्तोऽपि न जानीयात्, अतः बहुकालपर्यन्तं एषा वार्ता अज्ञाता अवर्तत। सः न केवलं अर्थैः अपि तु नानासु दिक्सु शङ्करानन्दस्वामिपादं साहाय्यञ्चकार। एवं क्रमेण श्रीरामकृष्णमानसपुत्रस्य स्मृतिमन्दिरनिर्माणाय बद्धपरिकराः नैके गुरुभ्रातरः शिष्याः भक्ताश्च बहुविधयत्नैः ब्रह्मानन्दस्मृतिमन्दिरनिर्माणाय सहकारमकुर्वन्।

## मन्दिरवैशिष्ट्यम्

ब्रह्मानन्दस्मृतिमन्दिरस्य निर्माणकार्यं शिवानन्द-सारदानन्द-तच्छिष्यसेवकानां तत्त्वावधानेन सञ्जातम्। अतः मन्दिरनिर्माणस्य स्थाननिर्वाचनं निर्माणकौशलम् इत्यादिविषये ब्रह्मानन्दस्वामिपादस्य स्वरूपं चरित्रमाधुर्यं च यथा प्रकाशेत तद्विधचिन्तनेन रूपरेखा चर्चिता। चिन्तनानुरूपेण कार्ये कृते सति ब्रह्मानन्दचरितस्य स्वकीयता इव मन्दिरमपि स्वतन्त्रतामलभत। उत्तरजीवने यदा स्वामिब्रह्मानन्दस्य अन्तरे गुरुशक्तेः पूर्णप्रकाशोऽभवत्, तदा सर्वे तदन्तर्गततया श्रीरामकृष्णस्य दर्शनं प्राप्नुवन्ति स्म। तस्य पृष्ठदेहदर्शनेन सः श्रीरामकृष्ण इव भाति स्म इति गुरुभ्रातॄणां शिष्याणाञ्च अभिमतम्।

द्वितलविशिष्टमन्दिरे महाराजस्य विग्रहः स्थापितः वर्तते। एषः विग्रहः एव मठे स्थापितः प्रथमः पूर्णावयवविग्रहः। पुष्पदलाकृतिखचितासने विराजितः महाराजस्य पश्चिमास्यकृत-श्वेतप्रस्तरनिर्मितः जीवन्त इव मर्मरविग्रहः। ब्रह्मानन्दासनमुभयतः श्रीरामकृष्णगर्भगृहस्थितस्तम्भद्वयमिव द्वौ स्तम्भौ निर्मितौ। श्रीरामकृष्णः जगदम्बाप्रदत्तं स्वमानसपुत्रं साक्षात् गोपालज्ञानेन भोजयति स्म। अतः कृष्णसखस्य महाराजविग्रहस्य

---

५ *अतीतेर स्मृति*; श्रद्धानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; २०१४, पृष्ठा - २१८

अधस्थितश्वेतप्रस्तरनिर्मितमञ्चे लघुसिंहासनोपरि श्रीकृष्णस्य बालगोपालमुर्तिः स्थापिता। अद्यापि तत्र राजामहाराजेन सह बालगोपालस्य नित्यपूजा भोगार्पणादिकं प्रचलति।

एतन्मन्दिरं राजामहाराजस्य अधिष्ठानस्थानमित्येव अस्य प्रधानवैशिष्टम्। अस्य सौन्दर्यं सुचारुरूपेण प्रस्फुटितं तद्गुरुभ्रातृभिः शिष्यप्रशिष्यभक्तजनैश्च। चतुर्षु दिक्सु तोरणानि विद्यन्ते। मन्दिरस्य स्तम्भानां उपरि बज्रनिरोधकेन सहितं सुशोभन्ते विष्णुचक्राणि। स्वामिब्रह्मानन्दशिष्यः अम्बिकानन्दस्वामिपादः सुसज्जितमञ्चस्थित-महाराजविग्रहस्य पश्चाद्भागे विद्यमानभित्तौ नीललोहितवर्णं स्थापयितुम् असूचयत्। द्वारे वैचित्र्यपूर्णा कपाटिका मन्दिरस्य सौन्दर्यम् अभिवर्धयति।

स्वामिब्रह्मानन्दस्य स्मृतिमन्दिरदर्शनेन तत् श्रीरामकृष्णमन्दिरस्य क्षुद्ररूपमिव भाति। प्रवीणसन्न्यासिभिः सह चर्चां कृत्वा महापुरुषमहाराजेन निर्णीतं यत्, श्रीरामकृष्णमन्दिरस्थितरेखाचित्राणि ब्रह्मानन्दस्मृतिमन्दिरेऽपि शोभेरन्।[६]

### मन्दिरनिर्माणक्रमः

१९२३ तमे वर्षे एप्रिलमासस्य ६ दिनाङ्के मन्दिरस्य पश्चिमतोरणं, ८ दिनाङ्के मध्यमोत्तरतोरणे, दक्षिणतोरणञ्च १० दिनाङ्के निर्मितानि। मन्दिरस्य लेपनकार्यं जुलाइमासस्य २ दिनाङ्के प्रारभत। कृष्णसखस्य मन्दिरे स्थितस्तम्भानामुपरि विष्णुचक्रस्थापनस्य निर्णयोऽभवत्। जुलाइमासस्य १ दिनाङ्के चक्रस्य रेखाचित्रम् अङ्कयित्वा नरसिंहमहोदयाय प्रदत्ते सति सः जुलाइमासस्य १४ दिनाङ्के प्रतिकृतिमेकां निर्माय अयच्छत्। अगस्तमासे महाराजस्य उपवेशनार्थं निर्मितमञ्चस्य रेखाचित्राङ्कनं कपाटिकायाः संस्थापनञ्च सुसम्पन्नम्।

---

६ देवलोके; अपूर्वानन्दः, स्वामी; रामकृष्ण-मिशन्-इन्स्टिटिउट्-अफ्-कालचार, कलकाता, १९९१, पृष्ठा - १४८

हाओडास्थितायां पञ्चाननतलायां कारककोम्पानि इत्यस्मात् विष्णुचक्राणि निर्माय आनीय सेप्टेम्बरमासस्य ३० दिनाङ्के सुवर्णजलसिञ्चनेन बज्रनिरोधकेन सह स्तम्भानामुपरि स्थापितानि। अक्टोवरमासे विग्रहमञ्चस्य कार्यारम्भोऽभवत्।

१९२४ तमवर्षस्य जानुयारीमासस्य ११ दिनाङ्के सम्पूर्णनिर्मितविग्रहस्य आनयनं जातम्। ततः तन्मासस्य २२ दिनाङ्कात् २५ दिनाङ्कं यावत् विग्रहमञ्चस्य तथा तत्पश्चाद्भागे स्थितानां स्तम्भानां सज्जीकरणं समाप्तम्। तदनन्तरं सर्वविधानि वर्णलेपनाद्यलंकारकार्याणि समाप्य मन्दिरप्रतिष्ठायाः प्रस्तुतिः प्रारब्धा।

## मन्दिरप्रतिष्ठा

१९२४ वर्षस्य जानुयारीमासस्य ८ दिनाङ्के स्वामिसारदानन्दलिखितपत्रात् ज्ञायते यत् ब्रह्मानन्दस्वामिपादस्य जन्मदिवसः तथा फेब्रुयारीमासस्य ७ दिनाङ्कः अस्य स्मृतिमन्दिरस्य प्रतिष्ठादिवसत्वेन निश्चितः। प्रतिष्ठादिवसात् पूर्वस्मिन्नहनि प्रायः ३५०० जनानां प्रसादव्यावस्था आयोजिता। अपूर्वानन्दस्वामिपादः तद्दिनस्य वर्णनायाम् अलिखत्—'स्वामिब्रह्मानन्दमहाराजस्य शुभजन्मोत्सवतिथौ विविधपूजानुष्ठानात् परं शतशतसन्न्यासिनां भक्तानाञ्च जयघोषेण महापुरुषमहाराजः स्वामिब्रह्मानन्दस्य समाधिमन्दिरस्य द्वारोद्घाटनेन महाराजस्य मनुष्यप्रमाणमर्मरविग्रहस्य प्रतिष्ठामकरोत्।'[७] विग्रहस्य सौन्दर्यावलोकनेन प्रतिभासते यत् महाराजः तदासने जीवन्तरूपेण उपविश्य अस्मान् आशीषं प्रयच्छन् सन्मार्गे गन्तुं प्रेरयन्नस्ति। मन्दिरस्य द्वितीयतले महाराजव्यवहृतवस्तुनि आनीतानि। तदारभ्य तन्मन्दिरे महाराजस्य नित्यपूजा प्रारब्धा।

आदिनं पूजा-पाठ-यज्ञ-भजनैः भक्त-दरिद्रसेवाभिश्च मठप्राङ्गणम् अभिभूतमासीत्। सन्ध्यायां मठवासिनः सर्वे मिलित्वा श्रीरामनामसंकीर्तनम्

[७] देवलोके; अपूर्वानन्दः, स्वामी; रामकृष्ण-मिशन्-इन्स्टिटिउट्-अफ्-कालचार, कलकाता, १९९१, पृष्ठा - १४८

अकुर्वन्। राजामहाराजस्य भावेन भावितः महापुरुषमहाराजः अत्यन्तकर्मव्यस्तः सन्नपि नानाविधस्मृतिचारणेन तत्प्रति श्रद्धाज्ञापनमकरोत्। तद्दिने स्वकर्मणा वाचा च महापुरुषमहाराजः 'गुरुवत् गुरुपुत्रेषु' इति वाक्यस्य जीवन्तप्रमाणमस्थापयत्।

## उपसंहारः

श्रीरामकृष्णस्य मानसपुत्रं प्रति यथायथमर्यदासहकारेण उपयुक्तस्थानप्रदानेन सह सर्वसमक्षे तन्माहात्म्यं न्यवेदयत् स्वयं स्वामी विवेकानन्दः। तद्विषयं मनसि स्वहृदयस्थं श्रद्धाञ्च विनिवेद्य महापुरुषमहाराजः स्वाचरणेन वार्तया च तद्भावम् अज्ञापयत् यत्—'महाराजस्यैव मठमिदम्। के वा वयं?... अहं तु तस्य सेवकः—तत्पादुकां शिरषि संस्थाप्य अत्र उपविष्टोऽस्मि। भरतः यथा रामचन्द्रस्य पादुकां सिंहासने संस्थाप्य राज्यशासनमकरोत्, अहमपि तथैव महाराजस्य पादुकां मस्तके धृत्वा तस्य कार्यं कुर्वन्नस्मि। सः यथा बुद्धिं प्रददाति, तथैव आचरामि।'[८] राजामहाराजविषये दशमसङ्घाध्यक्षेण वीरेश्वरस्वामिपादेनोक्तं, 'राजामहाराजः एव मठस्य ज्येष्ठः महाराजः (महन्तः)।'[९] ब्रह्मानन्दस्वामिपादस्य प्रयाणे व्याथितहृदयः 'श्रीमः' अवोचत्—'श्रीमहाराजः यथा पूर्वम् आसीत्, तथैव अधुनापि वर्तमानः, भविष्येऽपि चिरं वर्तिष्यते। सः सामयिकरूपेण देहरूपवस्त्रं परिधृतवान्, अधुना तदपि स्वेच्छया अत्यजत्, परन्तु सूक्ष्मशरीरेण सदा विद्यते।'[१०] स्मृतिमन्दिरेण जीवन्तमर्मरविग्रहेण च तस्योपस्थितिः आंशिकरूपेण कल्पिता।

अन्तिमे स्वामिब्रह्मानन्दस्य स्मृतिमन्दिरे तस्य सततविराजमानतामनुभूय, तद्दीव्यजीवनचरित्रम् अस्माकं जीवनमार्गे पाथेयरूपेण स्वीकृत्य,

---

[८] *शिवानन्द वाणी (द्वितीयभागः)*; अपूर्वानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; १९६९; पृष्ठा - ६५

[९] *शतवर्षे दुइ स्मृतिमन्दिर*; चन्द्रकान्तानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; २०२४, पृष्ठा - १३२

[१०] *ब्रह्मानन्दचरित*; प्रभानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; १९९५, पृष्ठा - ३०७

सारदानन्दस्वामिना विरचितश्लोकोल्लेखेन तत्प्रति सश्रद्धं प्रणामं विनिवेद्य अस्य लेखस्य समाप्तिः उद्घोष्यते यत्—

कालिन्दी फुल्लकमले माधवेन क्रीडारत।
ब्रह्मानन्दं नमस्तुभ्यं सद्गुरो लोकनायकः॥ [११]

ब्रह्मानन्दस्वामिपादस्य प्रणाममन्त्ररूपेण स्वीकृते श्लोकेऽस्मिन् अस्य महापुरुषस्य दिव्यसत्ता समग्रजीवनमर्मगाथा च प्रस्फुटिता भवतीति शम्।



[बेलुडमठे स्वामिब्रह्मानन्दमन्दिरस्य पुरोभागस्य चित्रम्]

[११] *शतवर्षे दुइ स्मृतिमन्दिर*; चन्द्रकान्तानन्दः, स्वामी; उद्बोधनकार्यालयः, कलकाता; २०२४, पृष्ठा - ११९

# वैवस्वतनचिकेतसोः संवादः

ब्रह्मचारिभिः जितेनरमेनप्रह्लादैः प्रणीतम्

प्रशिक्षणकेन्द्रस्य ब्रह्मचारिगणः २०२३-२५

स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे।
अवतारवरिष्ठाय रामकृष्णाय ते नमः॥

**सूत्रधारः**

पूजनीयान् आचार्यान् प्रणम्य, अद्य वयं काठकोपनिषदि वर्णितं जन्ममृत्युविषयकं अतिगम्भीरं यमराजनचिकेतसोः संवादं नाटकरूपेण प्रस्तुमः। कस्मिंश्चित् काले वाजश्रवसः इति नाम्ना कश्चिद् ब्राह्मणः आसीत्। वाजस्य दानेन यशः यस्य स वाजश्रवाः, तस्य पुत्रो वाजश्रवसः। स वाजश्रवसः विश्वजिन्नामकं यज्ञं कृतवान्, यत्र सर्वं धनं दातव्यम् आसीत्। तस्य वाजश्रवसस्य नचिकेताः नाम कश्चन कुमारः पुत्रः आसीत्। दक्षिणार्थं निष्फलाः गाः ददतं पितरं दृष्ट्वा तस्य कुमारस्य हृदये श्रद्धा आविष्टा। स विचारं कर्तुम् आरब्धवान्।

**नचिकेता अमन्यत**

ये एतादृशीः गाः ऋत्विग्भ्यो ददति, अनन्दान् नाम असुखवान् नाम लोकान् ते गच्छन्ति।

**इत्थं चिन्तयित्वा नचिकेता उवाच**

हे तात! कस्मै ऋत्विग्विशेषाय दक्षिणार्थं मां दास्यसि, कस्मै मां दास्यसि, कस्मै मां दास्यसि?

**पिता उक्तवान्**

(स्वगतम्) न अयं कुमारस्वभावः, (उच्चैः) मृत्यवे त्वां ददामि।

### नचिकेता अमन्यत

बहूनां शिष्याणां मध्ये अहं प्रथमः वा मध्यमः वा भवामि किन्तु कदाचिद् अपि अहं न अधमः। मया प्रदत्तेन यमस्य किं प्रयोजनं पिता साधयिष्यति? अवश्यं क्रोधवशाद् एव इदं पिता उक्तवान्।

### पिता उवाच

(शोकाविष्टः सन्) "किं मया उक्तम्? किं मया उक्तम्?"

### नचिकेता उवाच

(स्वगतम्) पितुः वचः मिथ्या मा भवतु।

(प्रकाशम्) हे पितः, केन प्रकारेण पूर्वस्मिन् काले पितृपितामहादयः वृत्ताः इति त्वम् अनुपश्य। यथा वर्तमानकाले साधवः वर्तन्ते इत्येतदपि त्वं प्रतिपश्य। तेषां मृषाकरणं वृत्तं कदापि नास्ति। मृषा कृत्वा कश्चिदपि अजरः अमरः न भवति। सस्यमिव मनुष्यः जायमानः म्रियमाणश्च भवति। अतः त्वं सत्यं पालय, यमाय मां प्रेषय।

### पिता उवाच

सत्यरक्षणार्थं त्वं यमभवनं गच्छ।

### सूत्रधारः

नचिकेता यमभवनं आगतवान्। तदा यमपुर्याम् यमराजः नासीत्। तिस्रः रात्रीः नचिकेता भोजनं विना तत्र एव वासं कृतवान्। त्रिभ्यः दिनेभ्यः परं यमः यमपुरीम् आगतवान्। तस्य अमात्या भार्याश्च अवदन्, ब्राह्मणः अग्निरूपेण गृहं प्रविशति। तस्य दाहशमनार्थं, हे वैवस्वत! जलम् आनय।

आशाप्रतीक्षे सङ्गतं सूनृतां चेष्टापूर्ते पुत्रपशूँश्च सर्वान्।
एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे ॥१.१.८॥

**मृत्युः उवाच**

भोः ब्राह्मण, देव! भवान् मम गृहे भोजनं विना तिस्रः रात्रीः उषितवान्। भवान् नमस्कारार्हः।

भवान् मम अतिथिः, तस्माद् मम पूजां स्वीकरोतु। यस्माद् भवान् भोजनं विना तिस्रः रात्रीः यापितवान् तस्माद् एकैकां तां रात्रिं प्रति त्रीन् वरान् प्रार्थयतु।

**नचिकेता उवाच**

आदौ भवान् मम पितुः चिन्तां शमयतु। स प्रसन्नमनाः क्रोधरहितः भवतु। मम पिता यमलोकाद् आगतस्य मम विषये लब्धस्मृतिः भवतु। एषः मम प्रथमः वरः।

**मृत्युरुवाच**

अस्तु। तव पिता पूर्ववत् त्वां प्रति स्नेहसमन्वितः प्रीतिसमन्वितः भविष्यति। स सुखेन प्रसन्नमनसा रात्रौ निद्रां करिष्यति। सः मृत्युमुखाद् मम लोकात् त्वां मुक्तं दृष्ट्वा क्रोधहीनः भविष्यति।

**नचिकेता उवाच**

स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति।
उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके ॥१.१.१२॥

एवंविधस्य स्वर्गलोकस्य प्राप्त्यर्थम् अग्निविद्यां मह्यं देहि। एषः मम द्वितीयः वरः।

**मृत्युरुवाच**

हे नचिकेतः! अहं तुभ्यं स्वर्गसाधनम् अग्निज्ञानं वदामि। एकाग्रमनसा शृणु। सः अग्निः अनन्तलोकस्य प्राप्तिसाधनः।

सः अग्निः विराड्रूपेण जगतः आश्रयः। सः अग्निः तव बुद्धिगोचरो भवतु।

**सूत्रधारः**

लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा।
स चापि तत्प्रत्यवदद् यथोक्तं अथास्य मृत्युः पुनरेवाह तुष्टः॥१.१.१५॥

**मृत्युरुवाच**

तव योग्यतां पश्यन् अहं प्रसन्नताम् अनुभवामि। तस्माद् इदानीम् अहं तुभ्यम् अन्यदपि किञ्चिद् ददामि।

तव नाम्ना अयम् अग्निः प्रसिद्धः भविता, अपिच इमाम् अनेकरूपां रत्नमयीं मालां स्वीकुरु।

हे नचिकेतः! यां स्वर्गसाधनभूताम् अग्निविद्यां द्वितीयेन वरेण त्वं प्रार्थितवान् असि, सा मया तुभ्यं दत्ता। इदानीं तृतीयं वरं वृणु।

**नचिकेता उवाच**

मृतमनुष्यस्य विषये अनेके संशयाः सम्भवन्ति। केचिद् वदन्ति शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तः देहान्तरसम्बन्धी आत्मा अस्ति। अन्ये एवंरूपम् आत्मानं न स्वीकुर्वन्ति। प्रत्यक्षेण अनुमानेन वा अस्य निर्णयः न सम्भवति। अतः एतद्विद्याम् अहं भवदुपदेशेन ज्ञातुम् इच्छामि। एषः मम तृतीयः वरः।

**मृत्युरुवाच**

एतस्मिन् विषये देवताः अपि संशयग्रस्ताः। एषः आत्माख्यः सूक्ष्मः धर्मः न सुखेन ज्ञेयः। अतः त्वम् अन्यं वरं वृणु।

**नचिकेता उवाच**

एतस्मिन् विषये देवताः अपि संशयग्रस्ताः? अपिच त्वमेव कथयसि यद् एष विषयः न सुज्ञेयः इति। पुनः त्वत्तुल्यम् अन्यं वक्तारम् अहं प्राप्तुं न शक्नोमि। तस्माद् इममेव वरं मह्यं प्रयच्छ। अन्यं वरम् अहं न प्रार्थयामि।

**मृत्युरुवाच**

> शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्।
> भूमेर्महदायतनं वृणीष्व स्वयञ्च जीव शरदो यावदिच्छसि ॥१.२.२३ ॥

यदि एतेन तुल्यम् अन्यं वरं मन्यसे तमपि वृणु।

किञ्च अन्यत्, कामानां दिव्यानां मानुषाणाञ्च त्वाम् अहं कामभागिनं करोमि।

ये ये कामाः मर्त्यलोके दुर्लभाः वर्तन्ते तान् प्रार्थय। दिव्याः अप्सरसः प्रार्थय। सर्वान् भोगान् प्रार्थय। किन्तु मरणविषये प्रश्नं मा कुरु।

**नचिकेता उवाच**

> श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेंद्रियाणां जरयन्ति तेजः।
> अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥१.१.२६ ॥

हे मृत्यो! एते सर्वे भोगाः अनित्याः, ते इन्द्रियाणां तेजः हरन्ति। दीर्घेण आयुषा वा किं करोमि, यतः ब्रह्मणोऽपि आयुः अल्पम् एव प्रतीयते। अहम् एतान् भोगान् नेच्छामि। अतः रथादयः नृत्यगीते च तव एव पार्श्वे तिष्ठन्तु।

मनुष्यः वित्तेन कदापि तृप्तो न भवति। भवन्तं दृष्टवतो मम किं वित्तस्य अभावः कदापि भविष्यति? यावत् त्वं यमपदे स्थितः तावद् मम मृत्युरपि न भविता। हे मृत्यो! आत्मविषयं विज्ञानं कथय। अहं नचिकेता अनित्यविषयं वरं न वृणोमि।

**मृत्युरुवाच**

हे नचिकेतः! त्वयि प्रसन्नोऽस्मि। त्वम् आत्मविषयिणीं विद्यां श्रोतुं मन्तुं विज्ञातुञ्च समर्थो वर्तसे। तस्मात् श्रृणु तम् आत्मानम् मया उपदिश्यमानम्।

> तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
> अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥१.२.१२ ॥

हे नचिकेतः! एष तव एव आत्मा। न परोक्षः विषयः। सोऽयम् आत्मा

अध्यात्मयोगेन अवबुध्यते। को नाम अध्यात्मयोगः? विषयेभ्यः मनः संहृत्य तस्य स्वात्मनि समाधानम् एव अध्यात्मयोगः। अनेन अध्यात्मयोगेन आत्मदेवं मत्वा विवेकी साधकः हर्षशोकौ अतिक्रामति।

**सूत्रधारः**

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नम्।
ब्रह्मप्राप्तो विरजोऽभूद् विमृत्युः अन्योऽप्येवं यो विदध्यात्ममेव ॥२.३.१८॥

यमेन उक्ताम् एतां ब्रह्मविद्यां प्राप्तवतः नचिकेतसः किम् अभवत्? स मुक्तः जातः। स ब्रह्मभावं प्राप्तवान्। स धर्माधर्मरहितः अभवत्। न केवलं नचिकेता एव, अन्यः यः कोऽपि एतां विद्याम् अधिगच्छति, सोऽपि विमुक्तः भवति। नात्र कोऽपि संशयः। नात्र कोऽपि संशयः।

ॐ सह नाववतु। सह नौ भुनक्तु। सहवीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै॥

ॐ शान्तिः शान्तिः शान्तिः
हरिः ॐ तत् सत्
॥ श्रीरामकृष्णार्पणमस्तु॥

# भारते शक्तिपूजा

आविरलाल-गङ्गोपाध्यायः

## उत्सर्गः

येषां करुणापाङ्गाद् जगतां सकलनारीमूर्तौ ग्रन्थकारः श्रीश्रीजगदम्बाया विशेषशक्तिप्रकाशं समुपलभ्य धन्योऽभवत्, तेषामेव श्रीपादपद्मे पुस्तिकेयं भक्तिपूरितान्तःकरणेन समर्पिताऽस्तु। इति

प्रणतो
**ग्रन्थकारः**

## प्रथमः प्रस्तावः

### शक्तितत्त्वपूजापद्धतिनिरूपणम्

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

अयमत्र आशयः जडेषु चेतनेषु सर्वेषु क्वचिद् अव्यक्ता क्वचिद् वा व्यक्ता सती संस्थिता तां शक्तिरूपिणीं देवीम् अहम् मुहुर्मुहुः प्रणमामीति।

हे पाठक, नवयुगेऽस्मिन् नवोद्यमैः सनातनी शक्तिः जागरिता पुनः! इयं किल प्रबुद्धा श्रीरामकृष्णभगवत्पादानाम् अलोकसामान्यैः त्यागतपोऽनिरतप्रेमाह्वानैः। किञ्च, प्रवृत्ता नरदेवस्य (रामकृष्णे रूढः) श्रीमद्विवेकानन्दस्वामिनो गुरुगतप्राणत्वात् प्रसन्ना सती परमकल्याणाय। तस्मात्

समस्तं हि भारतं, कालेन च समस्ता वै धरित्री अस्याः पूतस्पर्शात् नवभावैः पूर्णा सती कृतार्था स्याद् इति न तत्र सन्देहः। यतो हि ब्रह्मसद्भावात् सदैव अमोघा अविनाशिनी सर्वान्तर्निहिता सती ब्रह्मशक्तिः सर्वथा सकलनियमनकरी।

अस्ति शक्तेः चित्रप्रभाववशाद् एव सर्षपतुल्येऽपि बीजे विशालो वृक्षः, मांसपिण्डात्मकमनुष्यशरीरे जडजगन्नियामिका चैतन्यमयी बुद्धिः, तथा च आकाशादपि तरले इन्द्रियातीते च मनसि समस्तप्रपञ्चप्रतिष्ठा। अद्भुतोऽयं साधारणशक्तिप्रभावश्चेद् अन्तर्जगन्नियामिकाया अध्यात्मशक्तेर्महिम्नः कथं तावत् सातिशयत्वं स्यात्? कथं न पुनर्जगदिदं तस्याः पूजायै आबहोः कालात् प्राणान् अपि समर्पयितुम् इच्छेत्? पुनरपि जगति नवप्रबोधितायाः शक्तेः पूजा भविता प्रसृता। पुनश्च भारताः श्रीरामकृष्णभगवत्पादप्रबोधितां सनातनीं ब्रह्मशक्तिम् अर्चयित्वा स्वयं धन्याः सन्तः परान् अपि धन्यधन्यान् कुर्युः। अतो हि यथार्थोऽयं कालः शक्तितत्त्वशक्तिपूजापरामर्शात्मकः।

धवलशिरा वेद उवाच—*प्राचीना अपि शक्तिः नित्या नवीना, गुप्तभावात् व्यक्ता सती नवीनारूपेण प्रतीयते।*[१] अन्यथा, उवाच श्रीरामकृष्णदेवो यथा—परिवस्त्रान्तराले देवी सर्वदैव राजत इति। शक्तेर्नास्ति ह्रासः, नास्ति वृद्धिः, लोपस्य वा का कथा? आवरणस्य घनत्वसूक्ष्मत्वतारतम्यादेव वयं तावत् तस्या ह्रासं वृद्धिं वा कल्पयामः। क्वचिद्वा तस्या लोपः।

एकैव शक्तिः कतिवारं गुप्ता सती व्यक्ता, व्यक्ता सती गुप्ताऽभवद् इति को वा कथयितुं प्रभवति? यदैव व्यक्ता, तदैव नूतना। यदैव गुप्ता, तदैव लुप्तेति अनुभूयते। प्रतिकालं प्रचलतीयं लीला। देशं महादेशं पृथ्वीं जगच्चाखिलं स्वीकृत्य जातिं समाजं प्रतिपरिवारं व्यक्तिं च स्वीकृत्य प्रचलति

[१] अस्य साक्षाद् वेदोक्तेः अन्वेषणं न इतोऽपि पर्यन्ततां गतम्। तस्मात् एतावता एवमेव विचिन्तितं यत् स्वामिना बहूक्तीनां साररूपेणैव एव एषा उपन्यस्ता। यदि क्वचित् भागस्यैतस्य याथार्थ्यम् अस्मच्छक्त्या अन्वेष्य प्राप्यते तत् प्रकाश्यते।

नित्येयं लीला। चूर्णिताः कियन्तश्च ग्रहाः, पुनः सम्भूताश्च कियन्तः, पर्वतायिता देशाः, कियन्तश्च प्राप्तसमुद्रकवला इति केन शक्ष्यते निर्णेतुम्? ग्रहैकस्य पृथिव्यन्तरस्थदेशैकस्य वा कतिवारम् ईदृशदशाप्राप्तिर्बभूव इति वा कः प्रभवति कथयितुम्? तुषारावृतहिमालयशृङ्गे समुद्रनिर्घोषस्य, समुद्रगर्भे देशजनपदस्य, विद्यते हि इतिहाससत्ता। जनपदं शतैरब्दैः पुनश्च विपिनं शतैरिति किल रूढिः।

एवं नु कति जातयः समाजाश्च समुन्नता अवनताः, पुनश्च समुत्थिता इति को वा ब्रूयात्? अपि च, शैशवयौवनवार्धक्येषु स्वगतशक्तेस्तारतम्यं केन वा न प्रत्यक्षीकृतम्? को वास्य भारतस्य ऋषिर्वा योगी वा नानुभूतवान् पुनर्जन्मनि तस्या एव शक्तेः पुनर्विकासम्? अतो हि प्रफुल्लकमलाधिष्ठितायाः तन्व्या अनिन्द्यसुन्दर्याः पौनःपुन्येन गजग्रासोद्गारकथा क्वचित् धियाऽपि कविकल्पनेति न खलु मन्यते। यद्वा, देवर्षिनारददृष्टायां भागवतमायायाः सूचीछिद्रवर्त्मना आभीक्ष्ण्येन गजप्रवेशनिर्गमनस्य आख्यायिकायामपि नैवापद्यते सन्देहलवः। ददर्शैकदा भगवान् श्रीरामकृष्णदेवो जगज्जनन्या महामायायाः स्वरूपतत्त्वावगमनाभिलाषी सन्—अनुपमा सुन्दरी नारी सर्वाङ्गसुन्दरतनयप्रसवे तल्लालने पालने च निःशेषायासं स्वीकृत्य क्षणानन्तरं पुनः सहर्षं तं जग्रासेति! शक्तिः खलु प्रसवप्रलयरूपात्यन्तविपरीतगुणधारिणी इति परमिदं सत्यं शक्तितत्त्वपरामर्शाद् अनुभूयते। अर्वाचीनदार्शनिकैः अपि सिद्धान्तितं यत् नास्ति शक्तेर्विनाशः तत्परिमाणह्रासश्चेति। गुप्तव्यक्तभावमात्रम् आपद्यते।

तथैवास्मिन् भावराज्येऽपि। भावराज्ये सूक्ष्ममनोराज्येऽपि विद्यते शक्तेरेषा लीला। जातेः समाजस्य व्यक्त्युपलब्धस्य वा व्यावहारिकः पारमार्थिकश्च भावः कालेनाङ्कुरितो वर्धितः परिणतो लुप्तश्च सन् पुनः स भावतरङ्गः अपरेऽस्मिन् जातौ समाजे व्यक्तौ वा प्रविष्टः प्रकाशितश्च भूत्वा नूतनरूपेणोपलभ्यते। महाशक्तेर्विचित्रलीलावशात् तस्य प्राचीनत्वं नितराम् अननुभूय चिन्त्यते च तया

द्वितीयया जात्या, भावोऽयं न क्वचिज्जगति समुदितः इति। तथा च मदगर्वस्फीता सती कुटिलजीवनसमस्यायाः अपूर्वमिदं सरलं समाधानं तयाऽऽविष्कृतम् इति प्रचार्यते।

अर्वाचीनयुरोपामेरिके इत्यत्रोदाहरणे। प्राचीनानां भारतमिश्रयवनादिदेशानां सामाजिकनैतिकाध्यात्मिकादिभावतरङ्ग इदानीं तेषु देशेषु किञ्चित् अन्यथाभूतः पुष्टश्च सम्भूय समुत्थित इत्यतः प्रत्यक्षं तेषां देशस्थानां मदगर्वः। भोः पाश्चात्त्यदार्शनिक, त्वया क्रमविकासं, स्त्रीनिर्वाचनम्, अपत्यानुगतपितृगुणवादं चेत्यादि गृहीत्वा **आविष्कृतं जीवनशङ्कायाः सरलसमाधानम्** इत्युक्त्वा जगदिदम् आहूयत इति तु वृथैव गर्वः। पुनश्च स्थानान्तरितः स्याद् भावतरङ्गः। आपतति तामिस्रं परम् आलोकात्। जीवनाच्च परं पुनरुपतिष्ठते हि मृत्युः। जीवनशङ्कायाः जातिगतं किञ्चित् समाधानं नूनं तिष्ठेत् दूरपराहतम्। तर्हि व्यक्तौ समाधानम्? आबह्वोः कालात् या गतिः। **छिन्नः किल लक्षेषु एक एव वाताट** इति छेत्स्यति।

भो युरोप, दत्तः त्वया हृदयशोणितबिन्दुबिन्दुः क्षात्रशक्तेः वैश्यशक्तेश्च उपासनायै। तदेव घोरं तपस्त्वाम् उन्नतशिरस्कं विदधीत। भो अमेरिके, तत्पराऽसि तद्द्वयसहितशूद्रशक्तेराराधने। तस्मादेव त्वरितस्ते जातीयोदयः। किन्तु पुनर्यूयम् अवहेलिष्यथ महाशक्तेराराधनायाम्। विस्मरिष्यथ च काले। पुनः सा **सहस्रपरमा शतमूला शताङ्कुरा**[२] दूर्वादेवी अपराराधनप्रसन्ना सती उदिता स्याद् अपरत्र। अयमेव नियमः।

गुप्ताया व्यक्ता, व्यक्तायाश्च गुप्ता इति भावाभ्यां शक्तेर्लीला जगति सर्वत्र नितरां विराजिता। यस्मिन् व्यक्तौ समाजे जातौ च शक्तेः प्रथमोक्तभावस्य लीला घटते, तमेव वयं जीवन्तम्, उदयशीलं, भाग्यवन्तं च समवगच्छामः। यस्मिंश्च

---
[२] सहस्रपरमा देवी शतमूला शताङ्कुरा। सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी॥ इति तैत्तिरीयकृष्णयजुर्वेदान्तर्गतायां महानारायणोपनिषदि १.२८

अपरभावलीला तस्मिन्नेव वार्धक्यं, निरैश्वर्यम्, अनभ्युदयो, मृत्युच्छाया च समुपलभ्यते।

किञ्च, बहुकालसङ्गोपितशक्तेर्विकासो यस्य कायमनसोः समाश्रयेण जायते, व्यक्तशक्तेर्वा कार्यक्रमो येन याथार्थ्येन सञ्जायते, तस्मै अस्माभिः श्रद्धाभक्तिप्रणोदितैः कथम् उच्चपदव्याः प्रदानाय कृतप्रतिज्ञैर्भूयते। जडराज्ये स आविष्कारकः, मनोराज्ये दार्शनिकः, तथा च धर्मराज्ये मुक्तस्वभाव ऋषिः, यद्वा शुद्धसत्त्वविग्रहधारी अवतारः।

अस्माभिः पञ्चेन्द्रियैः यत्किञ्चिद् स्पृश्यते, मनसा यत्किञ्चित् चिन्त्यते, यत्किञ्चित् अनुमीयते, निर्मीयते च, तत्सर्वं शक्तिसहायात्, सर्वमेव शक्तिराज्याधिकारिभुक्। वेदमुखेन देवी वदति—

मया सोऽन्नमत्ति यो विपश्यति
यः प्राणिति य ईं शृणोत्युक्तम्।
अमन्तवो मां त उपक्षियन्ति
श्रुधि श्रुत श्रद्धिवं ते वदामि॥
अहं रुद्राय धनुरातनोमि
ब्रह्मद्विषे शरवे हन्तवा उ।
अहं जनाय समदं कृणोम्यहं
द्यावापृथिवी आविवेश॥ इति।

अयमत्राशयो यत्, मत्कारणादेव जीवन्ति लोकाः, अन्नम् अदन्ति, शृण्वन्ति च। ये मदवहेलनं कुर्वन्ति, ते विनश्यन्ति। श्रद्दधानोऽसि। तस्मात् त्वां कथये। ब्रह्मशक्तेः हिंसकानाम् असुराणां वधाय धनुर्धारिणो रुद्रस्य बाहौ अहमेव शक्त्यात्मना अवातिष्ठे। अहमेव लोकरक्षायै युद्धाय प्रवृत्तः। अहमेव आकाशपृथिव्योर्मध्ये प्रविष्टा सती विराजे।

शक्तिराज्यस्य पूर्वोक्ता अद्भुता विस्तृतिः येन क्वचिद् उपलब्धं तेन बुद्धं

यत् शक्तिपूजयैव जगत् चिराय व्यापृतम्। शक्त्याराधनाभिन्नम् उपासनान्तरं क्वचिदपि नाभूत्, कदाचिदपि न भविता। जडचेतनादि सर्वम् आ युगम् आ जीवितं शक्त्याराधनायै व्यग्रं सदपि पूजावसानाय न प्रभवति। अपि क्वचित् प्रभवेत्? प्रभवति चेदपि शक्तिसहायादेव—

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये। इति।

**शक्तिपूजाफलं क्षणात् प्रत्यक्षीक्रियते** इत्यस्ति रूढिः। तत्रापि कलौ। अन्ये च देवा निद्रिताः। वृथास्फालनम् अन्येषां शास्त्राणां शक्तिपूजानिरूपकतन्त्रनिचयभिन्नानाम् निर्विषभुजगानाम् इव। तथ्यमिदं किल पूर्णतः सत्यं नापि चेत् कियत् सत्यम्। यतो हि प्रत्यक्षीकरोमि यत् मनुष्या जडराज्ये मनोराज्ये च यत्किमपि अध्यकुर्वन् तत्सर्वं शक्त्याराधनाफलम्। जडशक्तिरूपेण या साधारणजनाक्षिगोचरा, तदाराधनयैव शारीरविज्ञानं, भूतविज्ञानं, रोगशान्तिः, महामारीप्रतिविधानम्, आहारसंस्थानं, धनागमोपायबाहुल्यं, युद्धाय युक्तानि अस्त्राणि शस्त्राणि चेत्यादि तस्य करतलगतम्। तथैव मानसिकशक्तिनाम्ना या प्रसिद्धा, तदुपासनया मानवस्य मनोविज्ञानं, कवित्वं, संयमो, विवाहविधानं, सभ्यता, नीतिः, समाजनिर्माणं, राजनीतिः इत्यादिकं तथा च आध्यात्मिकशक्तेरुद्बोधने सति ब्रह्मचर्यसत्यसन्तोषशमदामादिसाधनसम्पत्तयः, अन्ततश्च सर्वबाधाविनिर्मुक्तिरूपः परमपुरुषार्थोऽपि तस्याधिकारे। नूनं तु तत्सर्वं बहूनां बहुकालकृतप्रभूतशक्त्युपासनफलतया प्रकाशितं सदुपतिष्ठते। किन्तु मानवैः यत्किञ्चित् श्रद्धाभक्तिसहायेन या काचित् शक्तिः यथापरिमाणमुपासिता तत्परिमाणफलावाप्तिरेव साक्षात् प्राप्यते। ऐतत्कालिकानाम् उपासकानामपि तथ्यमिदं प्रत्यक्षसिद्धम्।

किन्तु पूजाया अङ्गहीनत्वात्, विधेः श्रद्धायाश्च विरहाद् वा नूनं तत्पूर्णफलावाप्त्यभावः। क्वचिच्च विपरीतफलप्राप्तिरपि जायते। यस्यां

पूजायां यद् यद् उपकरणम् आवश्यकं, तदायाससाध्यमपि समाकलनीयम्। यत्कारणसत्वे यद्विशिष्टफलोत्पत्तिः, स्यात् तत्र तत्समेषां संयोगापत्तिः। ऋजुत्वेऽप्यस्य तथ्यस्य, प्रतिनियतं तत्र मानवानां विस्मृतिर्जायते। इदं किल साम्प्रतम् अस्माभिर्बहुधा विस्मर्यते देशेऽस्मिन्! प्राप्यते च फलमपि तदनुगुणम्। अधुना शक्तिपूजाडम्बनेषु समग्रराष्ट्रस्य व्यापृतत्वेऽपि निर्वीर्यत्वं, धर्महीनता, विद्याहीनता, धनहीनता, अन्नहीनता, श्रीहीनता च। दोषस्तु पूजाविधिव्यतिक्रमः। रसायनविज्ञानव्युत्पन्नेच्छायां कश्चित् त्रिसन्ध्यास्नानं, हविष्यान्नभोजनं, रहसि बीजमन्त्रजपं च कुर्वाणश्चेत् क्व वा तस्य फलप्रत्याशा? अङ्गहीना तदिष्टशक्त्युपासना। महामारीप्रतिविधानाय कैश्चिद् बाह्यशौचविधानानि सर्वथा अपरिगणय्य भक्ष्यपेयादि अविचार्य होरां यावद् उच्चैर्हरिसङ्कीर्तनं क्रियते चेत् सा तच्चेष्टा किं विलक्षणा काचिद् वातुल्यभिन्ना? तदिष्टपूजोपकरणानाम् अत्यन्ताभावात्। दुर्भिक्षस्य करालग्रासाद् देशम् उद्धर्त्तुकामेन केनचिद् रक्षाकालीपूजामात्रं सम्पाद्य विगतज्वरेण स्थीयते, नवोपायेन अर्थागमे, अन्नवृद्धौ, अपराणां च इष्टोपायेषु दृष्टिः न दीयते, न च कल्प्यते चेत् तदाराधानमपि नूनम् अङ्गहीनमिति किं वाऽन्यत् कथयितुं शक्यम्? यः स्वदेशकल्याणाय प्रत्यहं भाषणे व्यग्रः, कणमात्रस्वार्थत्यागाय तु सर्वदैव अतत्परः, किं वाऽपि फलं प्रदीयते तदुपासनेन? उच्यते च **यस्योद्वाहस्य यो मन्त्रः इष्टं तस्योच्चारणम्**। एवं श्रद्धाहीनं, विधिहीनं, मन्त्रहीनम्, अदक्षिणं पूजनं कृत्वा ब्रूमः—**न प्राप्तं किल पूजाफलम्** इति। हा मानव, सहजबुद्धेः किं ते तावान् अभावः! असकृत् त्वां कथयति हि शास्त्रं, भवेयुः कार्यसिद्धये पञ्चकारणानि—

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्॥ इति।

यथा हि योग्यदेशः, उद्यमी कर्ता, पूर्णेन्द्रियग्रामः, पुनः पुनः उद्यमः, दैवं च। सामान्यबोधेनापि त्वया उपलभ्यते किल, एकस्मिन्

हस्ते दैवं, अपरस्मिन् पुरुषकारः सदृढं स्वीक्रियते चेदेव गन्तव्यवर्त्मनि भवितुमर्हति अग्रगः। अन्यथा, पुरुषकारसहायेन चेष्टा निर्भरशीलता चेत्येतदुभयं कथं ते प्रदत्तं भगवता? विस्पष्टं सकृत् चिन्तय तावत्, भारतस्य पूर्वपूर्वर्षयो मनोविज्ञाने, शारीरविज्ञाने, ज्योतिर्विज्ञाने, राजनीत्यादिषु पारदृश्वान आसन्, किं तत् केवलं मन्त्रजपैकप्रभावात्, चेष्टाविरहितदैवमात्रनिष्ठत्वाद् वा? भारतस्य तान्त्रिकावधूताः यत् सकलधातुविनिर्मितम् औषधं, विविधविषप्रयोगैः विविधरोगोपशान्त्युपायश्च आविष्कृतं तत् कीदृशानां निर्भयोद्यमपरीक्षाणां परिचायकम्! कियतां नु साधकानाम् अनुरागभक्तिपूतहृदयकृतशक्तिपूजनादेव प्रत्येकम् आविष्कृतम्! अधुना कश्चित् विषयविशेषाय अनुरागभक्तिसहकृतहृदयरुधिरकणं शुष्कीक्रियत इति दृश्यते चेत् निमील्यते त्वया नेत्रम्। श्रुत्वा हि मात्रं बलिदानं स्वार्थत्यागं च हतबोधेन त्वया विद्यते। किन्तु शृणु तावत्, भारतर्षिः कार्यं प्रदर्शयन् चिराय समुद्घोषयति—**श्रद्धाभक्तिसहकृतधैर्येण यथायथम् उपायं स्वीकुरुष्व, कष्टं समं संसह्य, हृदयस्य प्रतिशोणितबिन्दुपातमपि स्वीकृत्य शक्तिम् उद्बोधय, तर्पय च। स्वस्य प्रियं यत्किञ्चिद् वस्तु, अतिप्रियेऽपि च कायमनसी इष्टलाभाय देव्यै बलिरूपेण देहि। तेन पश्येः—यत्कामाय सनवोन्मेषः पूजयसि, तत् सेद्धा। सेद्धा च त्वद्भक्तिपूतैकसाधनया तव कुलजातिदेशानां महाकल्याणम्। आत्मानं धन्यं कुर्वाणः अपरसाधारणमपि धन्यं कुर्वीध्वम्।** इति।

बलिदानं सम्पूर्णस्वार्थत्यागं वा हित्वा अपूर्णा किल शक्तिपूजा, तथैव तत्फलमपि। छागमहिषबलिस्तु अनुकल्पमात्रम्। हृदयशोणितप्रदानम्। यत्कामाय पूज्यते तदर्थं स्वसमस्तकायमनसोः आत्यन्तिकसमर्पणम् ऋते कस्मिंश्चिदपि शक्तिपूजने फलसिद्धेरसम्भवः। **त्यागेनैके अमृतत्वमानशुः** इति वेदो वक्ति। त्याग एव आत्मज्ञानलाभपुरःसरे अमरत्वसम्पादने केवलोपायः। न च आत्मज्ञानमात्रे, स्वार्थसुखन्यासं विना खलु किञ्चिन्महत् जगत्यस्मिन्

लभ्यते। स त्याग एव शक्तिपूजापद्धतौ बलिहोमयोः केवलो लक्ष्यः। सर्वत्यागेन अमरत्वलाभः, विद्यार्थत्यागेन विद्यालाभः, धनार्थत्यागेन धनलाभः, प्रभुत्वस्य त्यागे प्रभुत्वलाभः इत्येवम् अपरापरविषयेष्वपि त्यागः बलिमाहात्म्यं नित्यप्रत्यक्षम्। तत्समेषां लाभोपायः त्यागः, रक्षोपायश्चापि त्यागः इति नित्यप्रत्यक्षम्।

लक्ष्यं यत्किमपि भवतु, शक्तिपूजायां सिद्धिर्विन्द्यते चेत् निरर्थकशक्तिक्षयो निवारणीयः। सर्वशक्त्याकरेण स्वान्तरस्थेन आत्मना सह संयुज्य ततः शक्त्यवरतरमार्गो परिष्कर्तव्यः। परं च सम्यक्-श्रद्धया आवाहनं, पूजा, आत्मबलिदानं च कृत्वा महाशक्तेः प्रसादो लम्भनीयः। तदैव देवी वरदा सती साधकस्य प्राणमनसोः अभिनवम् अपूर्वं बलम् उद्बोध्य सर्वभावेन ईप्सितार्थाय नियोजयेत्। तेनैव च करतलगता स्यात् फलसिद्धिः। कर्तव्यं यत् किञ्चित् सैव करिष्यति। निमित्तमात्रं स्यात् खलु साधकस्य मनः प्राणश्च।

तस्माद् विघ्नोत्सारणं, भूतबलिः, भूतशुद्धिः, न्यासः, प्राणायामः इत्यादि पूजायाः प्राक् कर्तव्यानां विषयाणां लक्ष्यं किल साधकस्य निरर्थकशक्तिक्षयनिवारणम्। येन केनचिद् वा उपायेन निरर्थकशक्तिक्षयनिवारणाद् एव समुद्दिष्टविषयलाभस्य प्रथमसोपानं समारूढोऽसि। अन्तर्निगूढपरमात्मनो ध्यानेन समुद्दिष्टविषयलाभाय या विशिष्टा शक्तिरावश्यकी, सा त्वयि समुद्बोधिता। सा शक्तिः सञ्चितात्मना, घनीभूततया, गृहीतमूर्तिमती सती प्रकाशिता। अन्त्ये च तस्या नवशक्तेर्नियोजनेन अभीष्टफलं संवृत्तं कलतलगतम्। सकलदेशकालेषु सकलफलसिद्धिविषये एव नियमोऽयं प्रवर्तितः। शक्तिक्षयनिवारणम्, आत्मनिहितमहाशक्तिध्यानम्, आत्मबलिदानं च। शङ्खघण्टाधूपदीपादीनाम् आडम्बरोऽस्तु, यद्वा मास्तु। सर्वविधशक्तिसाधकस्यैव सा अन्तर्निगूढेति जानीयाद्, न जानीयाद् वा। स्वस्मिन् शक्तिविशेषं प्रकाशयितुं पूर्वोक्तक्रमोपायो ज्ञातो वा, भवतु

वाऽज्ञातः। तथापि अभीष्टविषयं प्रति सर्वदा सर्वसाधकस्य पूर्वोक्तक्रमानुगणस्य तीव्रानुरागध्यानमात्रस्यैव फलसिद्धिप्रदाने हेतुत्वम् इति मननादेव ज्ञायते।

नैके पाश्चात्त्यदार्शनिकाः शक्तिं जडं मन्वाते। जडपरमाणुषु जडशक्तेः क्रीडां विहाय नान्यत् किञ्चित् तेषां नयनगोचरीभवति। विचित्रबहिर्जगत् तदपेक्षया समधिकविस्मयकरं च मानवान्तर्जगद् अपि यथोक्तदिशा जडमातापितरोः जडलीलाप्रसूतं जडापत्यम् इत्येव तैरुच्यते। मनोबलं, बुद्धिबलम्, आत्मबलं, सर्वमेव तथैवोत्पन्नम्। अपरे च जडचैतन्यभेदेन द्विधा शक्तिरिति कथयन्ति। एतद्विविधशक्तिक्रीडाया एव जगदुभयं प्रसूतम्। सूक्ष्मा चैतन्यशक्तिः, स्थूलां जडभगिनीं सततं स्ववशीकृत्य नियमयति।

द्वित्राणां केषाञ्चित् पाश्चात्त्यानां शक्तिविषयकं ज्ञानं भारतर्षीणां सामीप्यं भजते। तदपि अनुमानबलात्। न तु ऋषीणामिव तत् अनुभूतिफलम्। अन्यथा युरोपामेरिके कियद्दिवसात् प्रागेव चार्वाकमतम् उल्लङ्घ्य किञ्चिद् अग्रवर्तिन्यौ स्तः। युद्धेषु, धनागमकौशलेषु, बहुजनानां एकस्थलसंस्थाने सर्वत्र चैतन्येन साकं शक्तेः नित्यमेलनं प्रत्यक्षीकृत्यैव विशिष्टशक्तपदार्थेषु विश्वेस्मिन् जगति च भारतस्य ऋषयः शवशिवाराधनं[३] चक्रिरे। भिन्नाभ्रपर्वतश्रेणी, सागरवाहिन्यो नदनद्यः, ऊषाया रक्तिमच्छटा, तिमिरावगुण्ठनं सन्ध्यायाः इत्येतत् सर्वमेव तेषां सविधे तस्या अनन्तब्रह्माण्डप्रसविन्या देव्याः प्रतीकस्वरूपं सत् तस्याः सौम्यात्सौम्यतरा मूर्तिः प्रचकास्ते। अमानिशाया निश्छिद्रतामिस्रं, मृत्योः परुषालेख्यं, श्मशानस्य कठोरमौदासीन्यं, कालस्य संहारच्छाया इत्येषां समेषां पुनः तस्याम् एव करालवदनायां कोमलकठोरभावानां समकालसहावस्थानं नयनपथं समानीय तान् मोहयति स्म। देवासुरनित्यसङ्ग्रामस्थले मानवमनसि देव्याः पुनः विशेषप्रकाशं समुपलभ्य तस्या विशेषाराधनं व्यधीयत। मार्गदर्शकगुरोरन्तः, जगद्विमोहिन्याः स्त्रीमूर्तेरन्तः,

---

[३] शवशिवा आराधनम् इति च्छेदः।

विद्याक्षमाशान्तिमोहनिद्राभ्रान्त्यादिसात्त्विकानां तामसिकानां च गुणेषु, प्रत्येकं संसारस्थविशिष्टगुणसम्पन्नवस्तुव्यक्तिषु, तस्या एव अद्वितीयाया वराभयकराया मुण्डमालिन्या देव्या आविर्भावदर्शनेन, तस्याः श्रद्धासहकृताराधनेन स्वयं कृतार्थाः सन्तः समनुसृततन्मार्गं सुकृतिनं मानवं शिक्षितवन्तः।

कीदृशस्थानेषु शक्तेः कीदृशविशेषप्रकाशः, तथा च कस्य कथं वा पूजा विधीयते इति बहुविस्तारितोऽयं विषयः। अथ वयं तदालोचनायामेव प्रवृत्ता भवामः। अधुना उपसंहृत्यैतत् केवलम् उच्यते यत् भारतस्य कुलदेवी **दुःस्वप्ननाशिनी** शिवानी। तस्याः उपासनायां पूर्णभावेन आत्मबलिदानस्य ज्वलन्महिमानं द्रष्टुम् अनुभवितुम् इच्छाऽस्ति चेत् एहि, हे पाठक, क्षणाय निमीलितनेत्रः सन् ध्यानमार्गेण तस्य दक्षिणेश्वरस्य पञ्चवटीतले कुटीरनिवासिनः शक्तिसेवायै हृतदेहबोधस्य तस्य देवमानवस्य प्रेमिकस्य पदप्रान्तं, यं निकषा लब्धज्वलद्दीक्षो हि श्रीविवेकानन्दस्वामी अनन्तिकयुरोपामेरिकयोः चिरपददलितहिन्दूनां धर्मध्वजं डाययाञ्चकार, तीर्थास्पदस्य तस्यैव पदप्रान्तम् एहि क्षणाय सस्थैर्यम्।

॥इति श्रीश्रीरामकृष्णभगवत्पादपार्षदान्यतम-जगज्जननीश्रीसारदाम्बा-सेवकाग्रण्य-परिव्राजकाचार्यश्रीमत्सारदानन्दस्वामिचरणकृतौ **भारते शक्तिपूजा** इति नामके ग्रन्थे **शक्तितत्त्वपूजापद्धतिनिरूपणं** नाम प्रथमः प्रस्तावः॥

# विवेकस्तुतिः

सुमन्तपात्रः*

याम्यहं सम्प्रति त्वं कदा यास्यसि?
'यामि काले' ह्यहं मण्डले सन् हसन्।
योऽब्रवीदुत्तरं सादरं तं शिशुं
स्तौमि सप्तर्षिमूर्धन्यभूतं हि तम् ॥१ ॥

यः कदम्बात्तरोः शैशवे लम्बते
नास्ति भीतिर्यतो ब्रह्मदैत्याद् ह्यपि।
अश्वतो धावतो यः पपौ बालकं
वन्द्यतेऽसौ बिलेनामधारी शिशुः ॥२ ॥

यो गवाक्षेण मातुश्च वस्त्रं ददौ
प्रार्थिने वस्त्रहीनाय वै भिक्षवे।
याचकः सार्थकः स्याद्धि यस्मात्सदा
दानवीरः स नो विश्वनाथात्मजः ॥३ ॥

ध्यानमध्ये हि बाल्ये ददर्श प्रभुं
सुन्दरं मारजिद्विग्रहं गौतमम्।
योगिभिः कांक्षितं निर्विकल्पाख्यकं
शैशवे साधितं येन तस्मै नमः ॥४ ॥

सर्वखेलासु वाद्येषु पाठेषु च
भिन्नभाषासु यस्य प्रवेशो महान्।

* शोधच्छात्रः, संस्कृतविभागस्य, रामकृष्णमिशन्-विद्यामन्दिरस्य, बेलुडमठस्य।

यस्य वाङ्मन्दिरे नर्तकी भारती
तं नरेन्द्रं बुधं नौमि विद्याधरम् ॥५ ॥

ईश्वरो नास्ति वास्तीति जिज्ञासित-
संशयस्योत्तरं सन्न लब्ध्वा ततः ।
रामकृष्णादभूद् यस्तु निःसंशयस्-
ते नमो मेऽस्तु सत्यानुसन्धित्सवे ॥६ ॥

रामकृष्णस्य यो मानसो नन्दनो
यो यतीनां पतिर्वाक्पटुस्तीक्ष्णधीः ।
यस्त्वधर्मान्धकारस्य सूर्यः स्वयं
ब्रह्मतेजोमयं स्तौमि तेजस्विनम् ॥७ ॥

यस्य वाचस्पतेर्भाषणं सुन्दरं
विश्ववासी विश्रुत्य प्रमुग्धो महान् ।
दर्शितं गौरवं भारतीयं महद्
येन तस्मै नमो वीरसन्न्यासिने ॥८ ॥

आत्मनो गौरवं मन्यते किं न स
दुर्लभं भारते यस्य जन्माभवत् ।
किन्तु कोऽयं नरेन्द्रो विवेकी महान्
येन धन्या मदीया हि माता स्वयम् ॥९ ॥

# मानवतायाः प्रस्फुटितं शतदलम्*

## अनुवादकः– स्वामी वेदार्थानन्दः†

चतुश्चत्वारिंशदधिकोनविंशति-शततमस्य शकवर्षस्य, अमान्तवैशाख-मासस्य, शुक्लप्रतिपदा तिथिः। द्वाविंशत्यधिक-द्विसहस्रतमस्य ख्रिष्टाब्दस्य, मेमासस्य, प्रथमं दिनम्। प्रतिदिनं यथा, तथा अस्मिन्नपि पुण्यदिने पूर्वस्यां दिशि समुदितस्य सूर्यस्य प्रथमालोकेन प्रदीप्तमभवत् श्रीरामकृष्णमहामन्दिरस्य समुच्छ्रितं शिखरम्। सुवर्णालोकसमुज्ज्वलां भगवतीं गङ्गां साक्षीकृत्य रामकृष्णमिशन् स्वस्य वयोविस्तृतेः पञ्चविंशत्यधिकशताब्दानि अपूरयत्।

श्रीरामकृष्णसङ्घस्य प्रतिष्ठां कुर्वद्भिः श्रीमद्विवेकानन्दस्वामिपादैः प्रोक्तम्—"इत आरभ्य सार्धसहस्रवर्षाणि यावत् श्रीरामकृष्णभावतरङ्गः समस्तं विश्वम् आप्लावयिष्यते" इति। सोऽयं सङ्घः अद्य मनुष्येतिहासस्य कस्मिंश्चिद् महनीये सन्धिक्षणेऽस्मिन् अनितरसाधारणां श्रियमादधानो विराजतेतराम्।

भगवान् श्रीरामकृष्णः नरेन्द्रनाथम् अवदत्—"त्वं स्कन्धमारोप्य मां नीत्वा, यत्र अधिवासयिष्यसि, तत्रैवाहं भविष्यामि" इति। अष्टनवत्यधिकाष्टादश-शततमे ख्रिष्टाब्दे फेब्रुवरीमासस्य सप्तविंशे दिने विवेकानन्दस्वामिनः स्वयम्, आत्मारामकलशः इत्याख्यं भगवच्छ्रीरामकृष्णस्य पूतभस्मास्थिसञ्चयं स्कन्धमारोप्य, नीलाम्बरमुखोपाध्यायस्य उद्यानगृहाद् आरभ्य, मठप्रतिष्ठार्थं निश्चितं स्थानं प्रति पद्भ्याम् अगच्छन्, गङ्गातीरे तं भस्मसञ्चयं संस्थाप्य च अपूजयन्।

* Transcript of the documentary on Ramakrishna Mission: Blooming Lotus of Humanity

† आचार्यः, ब्रह्मचारिप्रशिक्षणकेन्द्रस्य, रामकृष्णमठस्य, बेलुडमठस्य।

भगवत्याः गङ्गायाः पश्चिमतीरे, दक्षिणेश्वरात् कोणाकोणि संस्थिता बेलुरमठस्य इयं भूः, तत्कालेऽपि न क्रीता आसीत्। बेलुरस्य अस्मिन् स्थाने अष्टनवत्यधिकाष्टादश-शततमे ख्रिष्टाब्दे दिसम्बरमासस्य नवमदिने मठोऽयं चिराय सुस्थिरो जातः।

अद्य रामकृष्णमठस्य रामकृष्णमिशनस्य च विश्वव्यापि यत् कर्मकाण्डं, तस्य प्रधानकार्यालयो वर्तते एषः बेलुरमठः। विश्वस्य चतुर्विंशतौ देशेषु त्रिसप्तत्यधिकद्विशतं (२७३) शाखाः, याः श्रीरामकृष्णभावधारायाः अग्रिमविस्ताराय सदैव तत्पराः। आसु अष्टविंशत्यधिकशतं (१२८) शाखाः रामकृष्णमठस्य सन्ति, पञ्चचत्वारिंशदधिकशतं (१४५) शाखाश्च रामकृष्णमिशनस्य। भारतस्यैव सप्तविंशतौ राज्येषु तावत्, षडधिकद्विशतं (२०६) शाखाः निरन्तरं लोककल्याणाय कर्मनिरताः वर्तन्ते।

आत्मस्वरूपावगत्या मोक्षप्राप्तिरेव संन्यासिनाम् अभीप्सितं लक्ष्यम्। तत्र विवेकान्दाचार्यः स्वगुरोः श्रीरामकृष्णाद् उपदेशमवाप्य इदमपि योजयामास— मानवसेवया जगत्कल्याणसाधनम्। संन्यासिनां जीवनम् अथ भवेत् बहुजनहिताय, बहुजनसुखाय। विवेकानन्दस्वामिपादाः रामकृष्णमठस्य रामकृष्णमिशनस्य च सुनिश्चितं लक्ष्यम् इत्थम् उदघोषयन्—आत्मनो मोक्षार्थं जगद्धिताय च इति। अर्थात्, निजमुक्तिः जगत्कल्याणञ्चेत्युभयं भविष्यति अस्य संस्थायुग्मस्य परमं लक्ष्यम्।

श्रीरामकृष्णस्य श्रीमुखादेव इदं नरेन्द्रनाथः प्रथमं श्रुतवान्—“जीवे न दया, शिवज्ञानेन जीवसेवा” इति। जीवेषु मा दयध्वम्, अपितु परमात्मदृष्ट्या तान् सेवध्वम् इत्यर्थः। तस्मिन्नेव दिवसे नरेन्द्रनाथः मनसा निश्चितवान्—यदिदम् अद्भुतम् अध्यात्मरहस्यं श्रीरामकृष्णस्य वचसा अद्य प्राकट्यं गतं, तदहं कदाचिद् विश्वस्मिन्नपि विश्वे प्रसारयिष्यामि इति। इदमेव गुह्यम् अनुशासनं परवर्तिनि काले विवेकानन्दस्वामिभिः कविताकारेण सुष्ठु प्रकाशितम्—“जीवेषु प्रेम यः

कुर्याद्, ईश्वरस्तेन सेव्यते" इति। अपिच स्वामिपादाः समादिशन्—"दरिद्रदेवो भव, मूर्खदेवो भव" इति।

अद्य समस्तेऽपि जगति रामकृष्णसङ्घस्य शाखाकेन्द्ररूपेण विद्यमानम् एकैकमपि आश्रमपदम्, मानवसेवाव्रतस्य अश्रान्तपालनाय कृतोद्यमम् एकैकं तपोवनम्। श्रीरामकृष्णस्य चरणयुगले सश्रद्धं समर्पितम् एकैकं सहस्रदलपद्मम्।

भगवान् श्रीरामकृष्णः उपदिशति स्म—"सत्यभाषणमेव कलौ तपस्या" इति। विवेकानन्दस्वामिनोऽपि बोधयन्ति—"सत्याय सर्वस्यापि त्यागः समुचितः, परन्तु कस्यापि कृते सत्यस्य त्यागो न युज्यते" इति। उपनिषदि च वयं शृणुमः—"सत्यमेव जयते नानृतम्" इति। ब्रह्म सत्यस्वरूपम् इति यावत्। विवेकानन्दस्वामिपादैः भारतवर्षं सत्यस्वरूपमिति हि विदितम्। सत्यस्य परिरक्षणाय, आदर्शस्य अनुसरणाय च रामकृष्णविवेकानन्दौ पौनःपुन्येन लौकिकजनैरनाश्रितमेव पन्थानम् असेवेताम्। इदञ्च विशिष्टाचरणं तयोः बाल्यजीवने एव परिलक्षितम्।

धनी कमारणी इति नाम्ना काचित् कर्म्मारकुलीना धात्री आसीत् कमारपुकुरे ग्रामे। तस्या एव हस्ताभ्यां शिशुर्गदाधरः भूजातः। तस्यै उपमात्रे स वचनं दत्तवान्—मम उपनयनाद् अनन्तरं प्रथमां भिक्षां तव हस्तादेव ग्रहीष्यामि इति। किन्तु ब्राह्मणकुमारस्य उपनयने ब्राह्मणेतरा काचित् भिक्षां प्रदद्याद् इत्येतत् तत्कालीनाः ग्रामीणाः कथम् अङ्गीकुर्युः। अत एव स्वजनानां मध्ये बलवान् विरोधः समुत्पन्नः। तथापि नवहायनो बालको गदाधरः स्वकुटुम्बीयेभ्यः इदं प्रत्यबोधयत्—ब्राह्मणस्य श्रेष्ठं लक्ष्म तावत् सत्यनिष्ठैव, नान्यत्। अतएव धात्र्यै धनीमात्रे दत्तं वचनम् उल्लङ्घ्य सत्यभङ्गं कृत्वा स कथन्नु ब्राह्मणः स्याद् इति॥ नववर्षीयस्य तस्य माणवकस्य वचनेषु दृष्टायाः युक्तिभद्रतायाः पुरस्तात् कुटुम्बिनां ग्रामवृद्धानाञ्च जात्याचाराश्रितो हठः पराभूतः।

भारतसाम्राज्यस्य तत्कालीनराजधान्याः अभ्यर्णे दक्षिणेश्वरक्षेत्रम्

अधिवसन् भगवान् श्रीरामकृष्णः, विश्वस्मै विश्वाय श्रावयामास गहनं धर्मतत्त्वम्—यति मतानि तति पन्थानः इति। समस्तानां परिच्छिन्नभावानां बाधकोऽयम् अमोघमन्त्रः, यस्मिन् आधुनिकमनीषिभिः प्रशस्यमाना सर्वाभिव्यापिनी भावना पूर्णाङ्गरूपेण प्रतिध्वनति। एवम्प्रकारेण श्रीरामकृष्णभगवान् आधुनिकमानुष्यकस्य अध्यात्मसम्पदः प्रतिनिधिः पर्यवसितः।

कोल्कत्तानगरस्य शिम्लापाडा इति ख्याते स्थाने श्रीमतो विश्वनाथदत्तस्य शिशुपुत्रः बिलेः कस्मिंश्चिद् दिने किमपि अश्रुतपूर्वं परीक्षणम् अकरोत्। विश्वनाथदत्तस्य उपवेशनागारे भिन्नजातीयानाम् अतिथीनां कृते भिन्नाः धूमपाननालिकाः स्थापिताः आसन्। बालको बिलेः तं प्रकोष्ठं प्रविश्य, प्रत्येकं धूमनालिकां स्वमुखेन स्पृशन् परीक्षाञ्चक्रे किमतो भविष्यतीति। किमस्याः नालिकायाः मुखाभिमर्शनेन जातिर्गमिष्यति, अथ गमिष्यति चेत् कथं वा गमिष्यतीति बालकस्य नरेन्द्रस्य महती इयं जिज्ञासा। अस्यां बाल्यलीलायामपि भविष्यत्कालीनस्य विवेकानन्दस्य युक्तिप्रवणा प्रमाणकुशला सत्यान्वेषिणी धिषणा भृशम् उन्मिषति।

प्राचीनानाम् ऋषीणाम् अध्यात्मोपलब्धिः यथा समेषाम् अस्माकं जीवने दिने दिने प्रस्फुटिता प्रयोगपदवीम् इयात्, तदनुरूपं खलु विवेकानन्दस्वामिपादाः रामकृष्णमठं रामकृष्णमिशनञ्च समुद्भावयामासुः। अध्यात्ममार्गस्य इयं काचन नवविधा, यस्याः सार्थकः प्रकाशः समुल्लसिष्यति जातिधर्मदेशादिनिरपेक्षं मनुष्यसेवनेन, पूजाबुद्ध्या निष्ठापुरस्सरं कर्तव्यनिर्वहणेन च। अध्यात्मचर्यायाः अयम् अर्वाचीनः आकारः स्वामिपादैः *'practical vedanta'* इति संज्ञितः। अनुष्ठानवेदान्तः अथवा प्रायोगिकवेदान्त इत्यर्थः। पञ्चविंशत्यधिकैकशतं वर्षाणि यावत्, अस्यैव प्रायोगिकवेदान्तधर्मस्य धारकौ वाहकौ च सन्तौ विराजेते रामकृष्णमठः रामकृष्णमिशन् च। सर्वधर्मसमन्वयं सेवाभावञ्च समाश्रित्य इदं

संस्थाद्वयं, विश्वमभिव्याप्य प्रकरोति बहु महत् कृत्यम्। अनन्यरूपमिदम् आध्यात्मिकसङ्घटनं सर्वथापि पक्षाभिमानरहितं राजनीतिनिःस्पृहञ्च वरीवर्ति।

भगवतः श्रीरामकृष्णस्य महासमाधेः परं विवेकानन्दस्वामिनः पारिव्राज्यमवलम्ब्य असकृत् देशान्तराणि अटितवन्तः।

नेदं तेषां पारिव्राज्यमात्रम्, अपि तु भारतवर्षस्य आविष्करणम्। भारतस्य साबल्यम् अपि च दौर्बल्यम्, उद्भूता विपत् अपि च उद्भविष्यन्ती सम्पत्—द्वितयमपि परिव्रजनकालेऽस्मिन् स्वामिपादाः सुष्ठु बुद्धवन्तः। राष्ट्रस्य नानादिक्षु क्वचिद् अनाहारेण मृतप्रायः सन्, क्वचित्पुनः राजादीनाम् समादृतो विशिष्टातिथिः सन्, क्वचिच्च सर्वैः निष्प्रत्यूहम् उपेक्षितः सन्, क्वचिद्वा नतशिरोभिः उपचरितः सन्, अयम् अध्यात्ममार्गमहारथी भारतराष्ट्रस्य अन्तरात्मनः परिचयं प्राप्नुवन् इत्थं कञ्चित् कालमनयत्।

त्रिनवत्यधिकाष्टादश-शततमस्य ख्रिष्टाब्दस्य सेप्तम्बरमासस्य एकादशेऽहनि विश्वधर्ममहासभायां स्वामिपादाः हिन्दुधर्ममधिकृत्य अभाषन्त। तदिदं भाषणम्, भाषितारं तम् अख्यातनामानं संन्यासिनम् अखिलेऽप्यमेरिकादेशे कतिपयदिनैः सुविख्यातम् अकरोत्। परन्तु सेप्तम्बरमासस्य एकादशदिनाङ्कस्य तस्यां रात्रौ मदुलशय्यायां शयानाः स्वामिनः न निद्रातुम् अशक्नुवन्। वेश्मभुवि क्षिप्तदेहाः ते स्वदेशस्य अनाहारक्लिष्टान् जनान् स्मरन्तः आप्रभातम् अश्रुविसर्जनम् अकुर्वन्। अपि च ते अप्रार्थयन् ईश्वरम्—दरिद्रान् स्वदेशवासिनः सेवितुमहं प्रभवेयम् इति।

अद्यदिनात् बहु पूर्वं स्वामिपादैः निश्चप्रचम् इदमवगतम्—यदि जनाः स्वावलम्बिनः आत्मनिर्भराः न क्रियन्ते, तर्हि समग्रविश्वस्य सम्पत्तिरपि भारतस्य एकस्मै ग्रामाय पर्याप्ता न भवेद् इति। स्वामिभिः प्रबोधितञ्च—"भारतस्य समस्याः सन्ति बह्व्यः, परन्तु तादृशी कापि समस्या न वर्तते या शिक्षायाः मन्त्रशक्त्या दूरीकर्तुम् न शक्या" इति।

अत एव हेतोः रामकृष्णमिशनद्वारा, अन्नदान-चिकित्साप्रदानादिभिः सेवाकार्याणां परिच्छेदो न कृतः। मानितविश्वविद्यालयेन सहिताः भारतवर्षमभिव्याप्य वर्तन्ते रामकृष्णमिशनस्य पञ्चविंशत्यधिक-सप्तशतं (७२५) विद्यालयाः उच्चविद्यालयाश्च। एतान् विहायापि वर्तन्ते षोडशाधिकसहस्रं (१०१६) रात्रिकालीनविद्यालयाः अनौपचारिकविद्यालयाः शिक्षणवर्गाश्च। स्वामिपादाः भगिनीं निवेदितां नियुञ्जानाः नारीशिक्षाविस्तारकर्मणि विशेषत उद्योगं प्रादर्शयन्। तस्यामेव दिशि प्रवर्तमानस्य पुरुषसङ्घटनभूतस्यापि अस्य रामकृष्णमठमिशन-संस्थाद्वयस्य बहुषु शिक्षाप्रतिष्ठानेषु युवानो यथा युवतयोऽपि तुल्यावसरम् अवाप्य शिक्षिताः सञ्जायन्ते। एकविंशत्यधिक-द्विसहस्रतमवर्षाद् द्वाविंशत्यधिक-द्विसहस्रतमवर्षपर्यन्ते (२०२१-'२२) शिक्षावर्षे, मठमिशनयोः विभिन्नेषु शिक्षाप्रतिष्ठानेषु विद्यार्थिनां सङ्ख्या त्रिनवत्यधिक-द्विशतोत्तर-पञ्चचत्वारिंशत्सहस्राधिकं लक्षम् (१,४५,२९३) आसीत्, अपिच विद्यार्थिनीनां सङ्ख्या आसीत् अष्टनवतिसहस्राणि (९८,०००)।

ईदृशस्य विपुलस्य शिक्षाकार्यव्यूहस्य प्रबन्धनप्रचालनाय गतवर्षे प्रायः एकपञ्चाशदधिक-चतुश्शतकोटि-रूप्यकाणि (४५१-कोटिरूप्यकाणि) व्ययीकृतानि। एतदतिरिच्यापि प्रतिवर्षं लक्षशो जनाः नानाविधैः शिल्पप्रशिक्षणप्रकल्पैः कर्मशालाभिः सङ्गोष्ठीभिश्च साक्षाद् उपकृताः। संन्यासिनां स्थिरपरिश्रमः, अपिच पञ्चविंशत्यधिक-शतवर्षाणाम् अनुभववैशारद्येन दृढतामापन्नः कर्मोपादानव्यूहः—एताभ्यां द्वाभ्यां संहताभ्यां हि अयं रामकृष्णमिशन्, पृथिव्यां बहुसङ्ख्यकान् मानवान् अनुदिनं साक्षरान् स्वाश्रितांश्च विदधद् वरीवर्त्ति।

नगरेषु यथा, तथैव नगरोपकण्ठेषु प्रान्तरेषु ग्रामेषु च शिक्षाप्रसाराय अग्रगण्यं कर्मकौशलं विधीयते रामकृष्णमठमिशनयोः शाखाकेन्द्रैः। आदिवासि-जनजातीनां निवासप्रदेशेषु शिक्षाविस्ताराय एतेषां शाखाकेन्द्राणां नानाविधाः

उद्योगाः विशेषत उल्लेख्याः सन्ति।

एतस्यै महत्यै कर्मपद्धत्यै स्वामिपादैः प्रकृष्टप्रभामयो यो दीपः प्रज्वालितः, तस्य आलोकपुञ्जेन जगदिदं वीतान्धकारम् अनुक्षणं जायतेऽद्य। बेलुरमठप्राङ्गणस्य मुख्यद्वारेण अन्तःप्रविष्टैरागन्तुकैः दक्षिणतः दृश्यमानम् इदं हि भवनं, पृथिवीमभिव्याप्य परिचाल्यमानस्य महतः कर्मकाण्डस्य मूलस्थानम्। परमपूज्यानां सङ्घाध्यक्षपादानाम् आशिषं शासनञ्च शिरसि निधाय, प्रशासकनिकायस्य निक्षेपधारिपरिषदश्च सदस्याः क्षमामण्डले सर्वत्र विततस्य सङ्घस्य कृत्यानि दिने दिने निर्वहन्ति।

शतवर्षाणि अतीत्य स्थितमिदं प्रतिष्ठानम् अद्यापि मानवसेवायाः विभामयं यं प्रदीपम् अक्षुण्णं रक्षन्ति, तस्मै वर्त्तिकानिर्माणं भगवतः श्रीरामकृष्णस्य हस्तेन हि समारब्धम्। वस्तुतः श्रीरामकृष्णसङ्घस्य प्रवर्तकः श्रीरामकृष्ण एव, नान्यः। तदीयसङ्घस्य अङ्कुरोद्गमो दक्षिणेश्वरे अजनि।

ततः क्रमशः सङ्घस्य कायकाण्डं, श्यामपुक्कुरे काशीपुरोद्याने च श्रीरामकृष्णस्य रोगशय्यां परितः उत्तरोत्तरम् अभिवृद्धिं गतम्।

पञ्चाशीत्यधिकाष्टादश-शततमस्य ख्रिष्टाब्दस्य दिसम्बरस्य एकादशे दिनाङ्के, अर्बुदाक्रान्तकण्ठः श्रीरामकृष्णः श्रीमात्रा श्रीसारदादेव्या सहितः, कतिपयैः त्यागिशिष्यैश्च साकम्, काशीपुरस्थम् उद्यानगृहम् आगत्य न्यवसत्। अत्र गृहे युगपत् श्रीरामकृष्णसेवानिरतैः अध्यात्मसाधनानिमग्नैः नरेन्द्रनाथप्रमुखैः समवेतैः युवशिष्यैः, श्रीरामकृष्णसङ्घस्य समारम्भो विहितः।

गृहेऽस्मिन्, दिनानाम् अष्टाशीत्यधिक-द्विशतम् उषित्वा श्रीभगवता श्रीरामकृष्णेन स्वस्य ऐहिकलीला समाप्तिं नीता। तथापि एषु कतिपयेषु दिनेषु स्वकरकमलेन प्रभुः, मठस्यास्य रूपरेखाम् आलिखितवान्। अत्रैव एकादशभ्यः शिष्येभ्यः स काषायवस्त्रं ददौ। नरेन्द्रनाथं पुरस्कृत्य सर्वानपि तान् एकत्रीकृत्य सङ्घं ससर्ज। श्रीरामकृष्णेन नरेन्द्र एवास्य सङ्घस्य नेता निश्चितः।

अस्मिन् अन्त्यलीलावसरे अनुदिनं श्रीभगवान् नरेन्द्रं पार्श्वमाहूय, सङ्घटनस्यास्य परिपालन-परिचालनादि-विषये विस्तरेण उपदिष्टवान्। महासमाधेः कतिभ्यश्चिद् दिनेभ्यः पूर्वम् अलौकिकोपायेन नरेन्द्रनाथे दिव्यशक्तिं सञ्चार्य तमनुगृहीतवान् श्रीरामकृष्णः। अपिच श्रीभगवान् नरेन्दमुवाच—"अद्य मे सर्वस्वं तुभ्यं दत्त्वा निष्किञ्चनः अभवम्। अनया शक्त्या त्वं जगदर्थे कर्म करिष्यसि" इति।

षडशीत्यधिकाष्टादश-शततमस्य ख्रीष्टाब्दस्य आगस्तमासीये षोडशे दिनाङ्के भगवतः श्रीरामकृष्णस्य महासमाधिरभवत्। ततः पञ्चदशासु दिनेषु व्यतीतेषु काशीपुरस्य तद् उद्यानगृहं श्रीरामकृष्णशिष्याः परित्यक्तवन्तः। श्रीरामकृष्णवचनमधुलोलुपाः त्यक्तगृहबन्धाः स्वीकृतगुरुसेवासपर्याः तदीयचरणैकशरणाः ते युवशिष्याः, तदा गत्यन्तरम् अपश्यन्तः, पुनः स्वगृहाणि गत्वा कञ्चित् कालं न्यवसन्। श्रीरामकृष्णजीवनस्य अन्तिमकाले या संहतिःकाचन तेषां मध्ये अजनि, सा अकस्माद् विनाशोन्मुखा इव अदृश्यत। किन्तु त्रयोविंशतिवयाः नरेन्द्रनाथः तां गतिं परिवर्तितवान्। नवीनस्यास्य सङ्घस्य परिरक्षणम्, किञ्च लोके पुनःप्रवर्तितस्य नवयुगधर्मस्य प्रसारणञ्चेति कृत्यद्वयस्य भारं श्रीरामकृष्णभगवान् नरेन्द्रनाथस्य हि करयोः न्यस्तवान्। अतः सः अनन्यसाधारणनेतृगुणसम्पन्नो यतिराट् सतीर्थ्यानुपेत्य स्वजीवनधर्मस्य दृढवचोभिरुपन्यासेन, स्वीकृतस्य शिवसङ्कल्पस्य भूयोभूयः स्मारणेन च साधनचतुष्टये तेषां समेषां निष्ठां सुस्थिरामकरोत्। तस्मिन्नवसरे श्रीरामकृष्णस्य गृहस्थभक्तेषु अन्यतमः श्रीमान् सुरेन्द्रनाथमित्रः नरेन्द्रनाथम् उपगम्य कञ्चित् प्रस्तावम् अश्रावयत्। सुरेन्द्रनाथः आह—"शीघ्रं हि समेऽपि ते त्यक्तसंसाराः युवानः गृहमेकं भाटकेन स्वीकुर्वन्तु। तत्र श्रीरामकृष्णस्य त्यागिशिष्याः ते संहताः निवसन्तु। श्रीरामकृष्णेन प्रदर्शिते पथि चरन्तु। साधनानि अनुतिष्ठन्तु। गृहस्थभक्तास्तु यथावसरं तेषां सविधमागत्य अध्यात्मकथाः श्रुत्वा बुद्ध्वा च तृप्तिं यास्यन्ति" इति।

इतःपरम् अचिरादेव सुरेन्द्रनाथमित्रेण प्रतिमासं क्रियमाणम् अर्थदानं समाश्रित्य वराहनगरे स्थितमेकं जीर्णगृहं भाटकेन उपात्तम्। भगवतः श्रीरामकृष्णस्य संन्यासिशिष्येषु तारकनाथः वृद्धगोपालश्च त्यक्तगृहौ अस्य मठस्य प्रथमनिवासिनौ सञ्जातौ। कालेन अत्र समागच्छत् नरेन्द्रः। ततो राखालः, कालीप्रसादः, शरत्, शशी च समागताः। अपिच समायाताः निरञ्जनः, बाबुरामः, सुबोधः, सारदाप्रसन्नः, योगीन्द्रः, लाटुः, गङ्गाधरश्च। सप्ताशीत्यधिकाष्टादश-शततमे ख्रिष्टाब्दे माघमासीये कस्मिंश्चित् प्रातःकाले नरेन्द्रस्य मार्गदर्शनेन, इमे गृहत्यागिनो युवानो विरजहोममनुष्ठाय विधिवत् संन्यासाश्रमं प्राविशन्। निर्माणतन्त्रज्ञो हरिप्रसन्नस्तु इतोऽपि द्वादशवर्षेभ्यः परं समानरीत्या संन्यस्तोऽभवत्।

वराहनगरमठे नवीनसंन्यासिनां नित्यसङ्गि आसीद् अर्थाभावजं दारिद्र्यम्। परन्तु विरक्तानां मुमुक्षूणाम् एतेषां यतीनां चित्तम् अभिभवितुम् इयं दुर्गतिः न क्षमते स्म। तानि दिनानि स्मरन् इत्थमाह स्वामी प्रेमानन्दः—“कस्मिंश्चिद् दिने एकदा किञ्चिदन्नं लभ्येत, न वा लभ्येत। पात्रस्थालिकादि किमपि नासीत्। क्वथितैः शाकपत्रैः सह ओदनः मानकचुपत्रे भुज्यते स्म। एवं स्वल्पे भुक्ते हि कण्ठे कण्डूतिः उत्पद्यते स्म। एतावान् क्लेशः, तथापि कस्यापि भ्रूक्षेपोऽपि नासीत्। पूजा, ध्यानम्, जपः, नामसङ्कीर्त्तनम् इत्यादिषु मनोऽस्माकं मुदितम् अवर्तत।” इति॥

द्विनवत्यधिकाष्टादश-शततमस्य ख्रिष्टाब्दस्य फेब्रुवरीमासस्य ऊनत्रिंशे दिने श्रीरामकृष्णजन्मजयन्ती आसीत्। इतः कतिभ्यश्चिद् दिनेभ्यः पूर्वं मठो वराहनगराद् स्थानान्तरं नीतः। आलम्बाजार् इत्याख्ये स्थाने अधुना मठः स्थितः। अमेरिकादेशात् स्वामिपादाः, चतुर्नवत्यधिकाष्टादश-शततमस्य ख्रिष्टाब्दस्य मार्चमासस्य ऊनविंशे दिने आलम्बाजारमठे निवसतः सतीर्थ्यान् उद्दिश्य प्रथमपत्रम् अलिखन्। ततःप्रभृति स्वामिचरणाः, सतीर्थ्यान् उद्दिश्य

प्रेषितैः अनेकैः पत्रैः, जगद्धितार्थम् आत्मार्पणाय तान् अनुरुन्धते स्म। दरिद्रान् अधःकृतांश्च नरान् नारायणस्वरूपान् विज्ञाय मम भ्रातरः सेवन्तामिति स्वामिपादानाम् हृदि कश्चिद् उदात्ताभिलाषः समुल्लसति स्म। तेषां कर्तव्यमिदं स्यात्—निरस्तलिङ्गभेदं प्रत्येकं मनुष्याणाम् अन्नाभावस्य दूरीकरणम् आदौ, ततश्च तेभ्यो विद्यादानमिति। तेषां कृते प्रदीयमानायां शिक्षायां धर्मोपदेशेन सह आधुनिकविज्ञानमपि अन्तर्भावनीयम्। ईदृशी एव शिक्षा मनुष्यं युगपदेव आत्मावलम्बिनं परार्थपरञ्च विधास्यति।

विवेकानन्दस्वामिनः पाश्चात्त्यदेशेषु झञ्झावात इव नगराद् नगरान्तरं गत्वा भारतस्य वेदान्तविद्यां प्रसारयन्तः एव, निरन्तरं पत्रैः स्वस्य सतीर्थ्यान् सेवाकर्मसु समुद्बोधयन्ति स्म। उद्दिष्टकर्मणां सुष्ठु सम्पादनाय किमपि सङ्घटनं नितराम् आवश्यकमस्ति इत्येतदपि स्वामिपादाः तान् पौनःपुन्येन स्मारयन्ति स्म। न केवलम् एतावदेव, अपितु भविष्यति काले तस्य सङ्घटनस्य कः कार्यभारः केन सतीर्थ्येन वहनीयः इत्येतद्विषये प्राथमिकनिर्देशोऽपि स्वामिपादैः तस्मिन्नेव काले सुविचार्य कृतः।

पञ्चनवत्यधिकाष्टादश-शततमस्य ख्रिष्टाब्दस्य जनुवरिमासे ब्रह्मानन्द-स्वामिनं प्रति स्वामिपादैः लिखितम्—"शशी गृहकार्यं पश्यतु। सन्यालः धनस्य क्रयणादिकर्मणश्च भारं गृह्णातु। शरत् सेक्रट्री भवतु, अर्थात्, पत्रलेखनादिकं निर्वहतु" इति। संन्यासिभ्यः सतीर्थ्येभ्य एव न केवलम्, अपितु गृहिभ्यः सतीर्थ्येभ्योऽपि कर्तव्यानि विभज्य प्रायच्छन् स्वामिपादाः। ते लिखितवन्तः—"महेन्द्रमहाशयं ज्ञापयतु यत् स कोल्कत्तानगरे मम एजेन्ट् वर्तते इति।"।

सङ्घटनसम्बद्धेषु कार्येषु कोल्कत्ता यथा, तथैव मद्रासनगरी च प्रधानभूतेति स्वामिनः अमन्यन्त। मद्रासे भूसङ्ग्रहणार्थं स्वशिष्याय अलसिङ्गप्पेरुमालाय पत्रम् अलिखन् स्वामिपादाः। अपिच कोल्कत्तायां भूसङ्ग्रहणाय ब्रह्मानन्दस्वामिने लिखितवन्तः—"बृहदेकं स्थानम् आवश्यकम्। दशसहस्ररूप्यकैः वा,

विंशतिसहस्ररूप्यकैः वा क्रीयताम्। गङ्गातटे एव भवेत्” इति।

स्वामिनां दृष्ट्या मठोऽयं स्यात् Purity Drilling Machine—शोधनवेधन-यन्त्रविशेषः। पवित्रतापादकं स्थानम् इत्यर्थः। अत्र चारित्र्यसम्पद् आहर्तव्या। शक्तिविकासश्च कर्तव्यः। तद्दिने मठवासिनां कृते स्वामिभिः यदुपदिष्टं, तत् चिराय सत्यम्। युगे युगे मनुष्याणाम् आत्मोन्मेषाय सोऽयमुपदेशो मूलमन्त्रायते—“Have faith in yourself. All power is in you! Be conscious and bring it out.” “आत्मनि विश्वासं निधेहि। त्वयि सर्वा शक्तिरस्ति। तां बुद्ध्वा बहिः प्रकाशय।” स्वामिपादानां स्नेहसम्भृतं हृदयम्, सुदृढा आदर्शनिष्ठा चेति द्वयोः सम्मेलनेन हि, रामकृष्णमठस्य रामकृष्णमिशनस्य च अयम् आत्ममोक्षार्थो जगद्धितार्थो महाव्रतः शक्यसम्पाद्यः सन् अद्यापि अग्रगतिम् आप्नोति।

श्रीरामकृष्णशिष्याः यदा अध्यात्मसाधनायाः स्रोतसि प्लवन्ते स्म, यदा मठस्यास्य एकैकः स्तम्भः क्रमशः प्रादुरभवत्, तदा पृष्ठभूमिमास्थाय माता श्रीसारदादेवी अनुपमस्नेहादरवती मठस्य छदिरिव सर्वान् परिपालितवती। श्रीरामकृष्णस्य महासमाधेः परं, श्रीमातुः श्रीसारदादेव्याः अनुमतिम् अवाप्य हि श्रीमद्विवेकानन्दस्वामिभिः स्वजीवनस्य समेऽपि गरीयांसो निर्णयाः स्वीकृताः।

सप्तनवत्यधिकाष्टादश-शततमस्य ख्रिष्टाब्दस्य फेब्रुवरीमासे, दिग्विजयी सम्राडिव स्वामिपादाः कोल्कत्तानगरं समागताः। प्रत्यागमनात् कतिपयेभ्य एव दिनेभ्यः परं, मार्चमासे ते श्रीमातुः श्रीसारदादेव्याः दर्शनाय प्रस्थिताः। मातुः चरणारविन्दयोः साष्टाङ्गं प्रणम्य कुशलप्रश्नाद्यनन्तरं स्वामिनः ताम् अवदन्—“मातः, अहं तस्योपदेशान् प्रसारयितुम् उद्युक्तोऽस्मि। तदर्थं यथासम्भवं शीघ्रमेव कस्यचन सङ्घस्य प्रतिष्ठापनञ्च चिकीर्षामि। किन्तु यावद्द्रुतं तत् चिकीर्षामि, तावद्द्रुतं तत् कर्तुं न शक्नोमीति कष्टमनुभवामि” इति। वचनमेतच्छ्रुत्वा श्रीमाता आह—“निश्चितं जानीहि—अस्मद्भगवान् शीघ्रमेव त्वदिच्छापूर्त्तिं विधास्यति।

द्रक्ष्यसि, कतिपयदिनाभ्यन्तरे एव तव आकूतिः कृतकार्या भवतीति।”

श्रीसारदादेव्याः एभिः सरलवचोभिरेव स्वामिपादानां मनसि पूर्वमुत्थितं सकलमपि चिन्ताद्वन्द्वं प्रशमं गतम्। भगवच्छ्रीमकृष्णस्य इच्छायाः विषये न पुनस्तेषां कोऽपि संशयः प्रादुरभूत्।

इतः कतिषुचिदेव दिनेषु गतेषु, असौ अमृतकालः समुपस्थितः—सप्तनवत्यधिकाष्टादश-शततमस्य ख्रिष्टाब्दस्य मेमासस्य प्रथमं दिनम्। कोल्कत्तायाः बाग्बाज़ार्-इत्याख्ये स्थाने बलरामबसु-महाभागस्य गृहे, संन्यस्तान् गृहस्थांश्च श्रीरामकृष्णशिष्यभक्तान् निमन्त्र्यानीय, विवेकानन्दस्वामिपादाः सभामेकां समायोजितवन्तः। सभारम्भे एव ते श्रीरामकृष्णनाम्ना कस्यचित् सङ्घस्य प्रतिष्ठापनार्थं प्रस्तावम् अश्रावयन्। ते अब्रुवन्—“बहुदेशान् अटतो मम दृढा मतिरियं समजनि, यद् विना सङ्घेन न किमपि महत् कार्यं शक्यसम्पाद्यम् इति। यस्य नाम्ना वयं संन्यासिनः सञ्जाताः, यं स्वजीवनादर्शं कृत्वा भवन्तश्च गृहाश्रमरूपं कर्मक्षेत्रम् अधितिष्ठन्ति, यस्य देहावसानाद् विंशतिवर्षेष्वपि अपूर्णेषु प्राच्ये पाश्चात्त्ये च जगति तदीयं पावनं नामधेयं चरितञ्च आश्चर्यकरं प्रसारं प्राप्नोत्, सङ्घोऽयं तस्यैव नाम्ना प्रतिष्ठितः स्यात्” इति। उपस्थिताः समेऽपि स्वामिनां प्रस्तावस्यास्य समर्थनं कृतवन्तः।

मेमासस्य पञ्चमे दिनाङ्के समायोजितायां द्वितीयसभायां नूतनसङ्घटनस्य नामकरणं जातम्—रामकृष्णमिशन्-असोसियेषन्। स्वामिपादाः तस्य साधारणसभापतिपदं गृहीतवन्तः, ब्रह्मानन्दस्वामी च कोल्कत्ताकेन्द्रस्य सभापतित्वम् अगृह्णात्। इत्थं मिशनस्य प्रतिष्ठापनात् चतुर्भ्यो वर्षेभ्यः परम्, स्वामिपादैः संशोध्य निश्चितेन ट्रस्ट्-डीड् इत्याख्येन लेखेन रामकृष्णमठः नियमानुगां स्वीकृतिं प्राप्नोत्। रामकृष्णमिशन्-असोसियेषन् तु पञ्जीकृतसमितिरूपेण नियमानुगां स्वीकृतिं प्राप्नोत् नवाधिकोनविंशति-शततमे ख्रिष्टवर्षे।

कोल्कत्तानगरे मिशनस्य कर्म समारब्धं चेदपि मद्रासनगरे स्वामिनाम् इच्छानुरूपं तदानीमेव कर्मारम्भो न जातः। तत्रत्यकर्मणां दायित्वं स्वामिपादाः शशिमहाराज इति ख्यातस्य रामकृष्णानन्दस्वामिनः हस्तयोः समर्पितवन्तः। स्वामी रामकृष्णानन्दः मद्रासे कणसङ्ग्रहणन्यायमनुसरन् महता क्लेशेन स्वामिपादानाम् ईप्सितं मठं निर्मातुम् आरभत।

(स्वामिना रामकृष्णानन्देन भेदभावादिकम् अपास्य किंविधं नरनारायणसेवाकार्यं विहितम् इति विषये संघाध्यक्षमहाराजानां गौतमानन्दस्वामिचरणानाम् इयं वाग् अवलोकनीया)

“दक्षिणभारते ऐदम्प्राथम्येन रामकृष्णानन्दस्वामी जातिवर्णादिभेदम् अपास्य मिश्रभोजनं समायोजितवान्। श्रीरामकृष्णजन्मोत्सवादिसम्बद्धेषु विशिष्टदिवसेषु स्वामी स्वयम् आश्रममागतैः सर्वैरपि जनैः सह समासीनो भवति स्म। आश्रमप्राङ्गणे निरस्तभेदभावं सभक्तिश्रद्धं समेभ्योऽपि जनेभ्यः प्रसादभोजनं प्रदीयते स्म। स्वामी अपि तैः सह प्रसादान्नं भुङ्क्ते स्म। नरनारायणसेवा इति बुद्ध्या हि इदम् अनुष्ठीयते स्म। दक्षिणावर्ते ईदृशं मिश्रभोजनम् अदृष्टपूर्वमासीत्।”

मठस्थाः संन्यासिनः दीर्घकालादेव सेवाकर्मभिः युक्ताः आसन्। गुरोः श्रीरामकृष्णस्य शुश्रूषाकर्मभिरेव सेवाकर्मसु तेषां दीक्षा सञ्जाता इति वक्तुं युक्तम्। स्वामिपादैः प्रवर्तितेऽस्मिन् मिशन्-इत्याख्ये महायज्ञे आद्यार्हणा इव तेषां निःस्वानां समेषां सम्मिलिता सेवाभावनेयं सहस्रदलाकारमवाप्य विकसन्ती लसति स्म।

कोल्कत्तायां रामकृष्णमिशनस्य प्रतिष्ठापनात् कतिपयदिनेभ्यः परम्, स्वामी अखण्डानन्दः परिव्राजकः सन् वङ्गेषु मुर्शिदाबाद-जनपदस्य महुला-इत्याख्यं स्थानं सम्प्राप्तः। तदानीं मुर्शिदाबादजनपदः दुर्भिक्षपीडित आसीत्। क्षुधार्तान् रोगाक्रान्तांश्च जनान् अवलोक्य तेषां कृते किमपि साहाय्यमाचरणीयमिति

उत्कटेच्छाम् अनुभूतवान् सः। तस्य उत्साहभङ्गाय बहुभिः प्रयतितम्। तथापि श्रीमत्स्वामिपादाः साह्लादम् अखण्डानन्दस्वामिने पत्रं प्रेषयामासुः। तत्राहुः—"साधु साधु साहसिक। श्रीगुरुर्विजयतेतराम्। क्रियतां तत् कर्म। धनं यदपेक्षितम्, तद् अहं दास्यामि" इति।

यथाचारं मिशनस्य कृत्यारम्भात् परं पञ्चदशसु दिनेषु गतेषु, अर्थात् सप्तनवत्युत्तराष्टादश-शततमस्य ख्रिष्टाब्दस्य मेमासीये पञ्चदशे दिनाङ्के, अखण्डानन्दस्वामी महुलाग्रामे दुर्भिक्षपीडितानां त्राणकर्म समारभत। इदमस्ति रामकृष्णमिशनेन ऐदम्प्राथम्येन समायोजितं त्राणकर्म।

इतः कतिभ्यश्चिद् दिनेभ्यः परमेव इदानीन्तनस्य बाङ्लादेशस्य दिनाजपुरे दुर्भिक्षपीडितानां जनानां कृते अन्नदानं समारब्धम्। अनतिविलम्बेन देउघर् इति ख्याते स्थानेऽपि त्राणकार्येषु निरताः जाताः रामकृष्णमठीयाः संन्यासिनः। अक्टोबरमासे दक्षिणेश्वरग्रामे अतिवृष्ट्या विपन्नानां जनानां कृते तण्डुलराशयो वितीर्णाः॥ रामकृष्णमिशनस्य प्रतिष्ठापनात् वर्षाभ्यन्तरे हि, कोल्कत्तानगरे प्लेगरोगस्य लक्षणानि दृश्यन्ते स्म। विवेकानन्दस्वामिनः तदा दार्जिलिङ्गान्ते आसन्। वार्तां श्रुत्वैव ते कोल्कत्तां प्रत्यागत्य संन्यासिब्रह्मचारिणां भक्तानाञ्च सभाम् अकुर्वन्। तत्र तैः इदमुक्तम्—"वयं सर्वेऽपि भगवतः पूतनाम्ना अत्र सम्मिलिताः। मरणभयं तुच्छीकृत्य एषां प्लेगरोगिणां सेवा करणीया। एषां सेवार्थम्, औषधार्थम्, चिकित्सार्थञ्च अस्माकं नूतनमठस्य भूमिः विक्रेतव्या चेदपि, अथ अस्माकं जीवनमेव उत्सर्जनीयं चेदपि, वयं सन्नद्धाः।" इति।

भगिनी निवेदिता, स्वामी सदानन्दश्चेत्यनयोः स्वामिनां शिष्ययोरासीत् अग्रिमे वर्षद्वये रामकृष्णमिशनेन समारब्धानां प्लेगसम्बद्धकार्याणां नेतृत्वम्। स्वरक्षाविषये उद्वेगमकृत्वा तौ यथा इमं सेवायज्ञं निरभिसन्धि निरवहताम्, तन्नूनम् आश्चर्यकरीः पौराणिकीराख्यायिकाः समनुस्मारयतीति नेयम् अतिशयोक्तिः।

एवं दिशि दिशि नरनारायणसेवाव्रतस्य एकैकः प्रदीपः प्रज्वालितो जातः। स्वामिपादानाम् "जीवेषु प्रेम यः कुर्याद्, ईश्वरस्तेन सेव्यते" इति वचः समाकर्ण्य ऊनविंशतिशततमे ख्रिष्टवर्षे केचन युवानः काश्याम् असहायविधवानां कृते सेवाकार्याणि समारब्धवन्तः। स्वामिपादाः स्वयं तानि कर्माणि प्रत्यक्षीकर्तुं तत्रागच्छन्। सर्वं दृष्ट्वा अतीव प्रसन्नाः भूत्वा ते तत्प्रतिष्ठानस्य नाम Home of Service अथवा सेवासदनम् इति कृतवन्तः।

स्वामी कल्याणानन्दः, स्वामी निश्चयानन्दश्च तपोभूमौ हरिद्वारे संन्यासिनां कुटीरान् गत्वा असहायान् असुस्थांश्च तापसान् सेवितुम् आरब्धवन्तौ। रामकृष्णमिशनस्य संन्यासिभिः क्रियमाणम् इदं सेवाकर्म, उत्तरभारतस्य प्राचीनाचारवादिभिः संन्यासिभिः आद्यकाले तावत् साधुदृष्ट्या न वीक्षितम्। तैः, सेवानिरताः रामकृष्णमिशनस्य संन्यासिनः, भङ्गिसाधुशब्देन सोपहासं निर्दिश्यन्ते स्म। भङ्गिसाधुः इत्यस्य मलादिसम्मार्जकः संन्यासी इत्यर्थः। परन्तु उपहासाद्भीताः अभूत्वा ते सेवायोगिनो यतिवर्याः रोगिनारायणशुश्रूषायाम् अविरतकृत्याः अतिष्ठन्। तेषां सेवानुष्ठानं गच्छति काले उत्तराखण्डस्य संन्यासिसमाजे गभीरश्रद्धायाः विषयः समजनि।

वङ्गप्रदेशस्य मुर्शिदाबादे सप्तनवत्यधिकाष्टादश-शततमवर्षे समारब्धानि दुर्भिक्षत्राणकर्माणि यदा समाप्तानि, तदा कतिचिद् अनाथबालकान् अन्तेवासिरूपेण स्वीकृत्य अखण्डानन्दस्वामी आश्रमं प्रतिष्ठापयामास। इदमेव रामकृष्णमिशनस्य प्रथमं शाखाकेन्द्रम्।

शिकागोधर्ममहासभायाः मञ्चमधिरुह्य श्रीमद्विवेकानन्दस्वामिपादाः यां परमोदारभावनां समुद्बोधितवन्तः, तस्या एव व्यवहारपदमानीतम् अनुष्ठानं वयम् ईदृशेषु रामकृष्णमिशन-प्रवर्तितसेवाकर्मसु प्रत्यक्षम् उपलभामहे। यथा नानाधर्मावलम्बिनो जनाः मिशनस्य सेवामन्दिरे सेव्यपदम् अलङ्कृत्य सुखिनः सञ्जाताः, तथैव नानाधर्मावलम्बिनो महानुभावाः अस्मिन् महायज्ञे यथाशक्ति

धनादिदानद्वारा बलिमप्याहृतवन्तः।

सप्तनवत्यधिकाष्टादश-शततमवर्षे कोल्कत्तानगरे भूमिकम्पः अभवत्। तेन आलम्बाजारमठीयं गृहं क्षतिग्रस्तं जातम्। प्राकारेषु पाटनानि भङ्गाश्च अदृश्यन्त। अतो मठः स्थानान्तरं नेतव्य इत्यापतितम्। एतस्मिन्नेव समये, मठस्य स्थिरप्रतिष्ठायै अनुरूपायाः भूमेरनुसन्धानमपि क्रियते स्म। भगवत्याः गङ्गायाः पश्चिमतटे बेलुरग्रामे भूसङ्ग्रहाय निर्णयो जातः। तत्र गङ्गातटे नीलाम्बरमुखोपाध्यायस्य सुलक्षणम् एकम् उद्यानगृहम् उपलब्धम्। विना विलम्बम् आलम्बाजारस्थ-गृहात् रामकृष्णमठः नीलाम्बरवर्यस्य उद्यानगृहं नीतः।

ततः कतिभ्यश्चिद् दिनेभ्यः पूर्वमेव बेलुरमठाय निश्चितायाः भूमेः क्रयणविषये प्रतिश्रुतिः कृता। देशाद् विदेशाच्च स्वामिपादानाम् अनेके भक्ताः, रामकृष्णसङ्घस्य ऐतिहासिकेऽस्मिन् अग्रिमपदन्यासकर्मणि प्रत्यक्षतः परोक्षतो वा साहाय्यम् आचरितवन्तः। विवेकानन्दस्वामिपादैः निदिध्यासितम् इमं सङ्कल्पं साक्षात्कर्तुं, मुक्तहस्तं साहाय्यमाचरितवत्सु अन्यतमा आसीत्, सुश्रीः फान्सिस्-हेन्रिटा-म्युलर्। सा निजेच्छया मठाय, भूमिक्रयणार्थम् आवश्यकस्य धनस्य सिंहभागं प्रदत्तवती। तैरेव अर्थैः, मठस्य स्थिरभवनस्य निर्माणाय बेलुरे गङ्गातटे सेयं भूमिः क्रीता।

तस्याः भूमेः पूर्वपार्श्वे भगवती मन्दाकिनी। उत्तरपूर्वपार्श्वे पुरातनं भवनद्वयम्। तन्निकटे कतिपयवृक्षाः। तेषां मध्ये स प्रसिद्धः आम्रवृक्षोऽप्यासीत्। अद्य स वृक्षः ‘स्वामिपादानाम् आम्रवृक्षः’ इति ख्यातिमापन्नो वर्तते। अपिच, नवार्ज्जितभूमेः प्रायेण दक्षिणप्रान्ते एते त्रयो देवदारुवृक्षाश्च अवर्तन्त, ये इदानीं स्वामिपादानां समाधिमन्दिरस्य समीपं दृश्यन्ते। एते वृक्षाः आदितः अद्यावधि विततस्य बेलुरमठेतिहासस्य त्रयो मूकसाक्षिणः तिष्ठन्ति।

बेलुरमठाय सङ्गृहीतायाम् उच्चावचायां तस्यां भूमौ, तदानीम् एकतलं

प्राचीनमेकं भवनमासीत्। संस्कृत्य तद् भवनं द्वितलं कृतम्। प्रकोष्ठकानि च योजितानि। अस्य भवनस्य द्वितीये तले, दक्षिणभागे स्थितायाम् अस्यां हि कक्षायां स्वामिविवेकानन्दाः ऐहिकजीवनस्य कतिचन अन्तिमवर्षाणि न्यवसन्।

अस्य भवनस्य पार्श्वे एव अन्यदेकं द्वितलं भवनं निर्मितम्। तस्यैव द्वितीयतले नवीनमठस्य अभिनवं मन्दिरं सज्जीकृतम्। अत्र मन्दिरे श्रीभगवतः श्रीरामकृष्णस्य नित्यपूजा प्रवर्तिता। अत्र गर्भमन्दिरं लघ्वाकारम्। पश्चिमभागे श्वेतशिलामयी वेदिः। कुड्ये क्षारचूर्णपङ्केन चित्रिता अलङ्कृतिः। काष्ठमये सिंहासने श्रीभगवतः चित्रपटं संस्थाप्य पूजा क्रियते स्म। इहैव वेद्यामासीत् आत्मारामकलशः। बेलुरग्रामेऽत्र मठस्य स्थिरीकरणात् परं, श्रीरामकृष्णस्य नित्यपूजाम् अतिरिच्यापि विशेषतः केषाञ्चिद् उत्सवानाम् अनुष्ठानम् उपक्रान्तम्।

एकोत्तरोनविंशति-शततमवर्षे स्वामिपादाः बेलुरमठे श्रीश्रीदुर्गापूजा अनुष्ठातव्येति निर्णीतवन्तः। रघुनन्दनस्मृतिम् आनीय स्वयं स्वामिपादाः पूजाविधीन् अधीतवन्तः। यथाशास्त्रमेव पूजा भवेदित्यासीत् तेषां मतिः। ततश्च महिषासुरमर्दिन्याः प्रतिमां समानीय यथातिथि सहर्षाडम्बरं मठे महापूजा सुष्ठु सम्पादिता। अस्याः पूजायाः सङ्कल्पवाचनं श्रीमातुः श्रीसारदादेव्याः नाम्ना कृतम्। तदारभ्य रामकृष्णसङ्घस्य सर्वेषु शाखाकेन्द्रेषु इयमेव परम्परा अनुसृता वर्तते॥ प्रथमवारं मठे अनुष्ठितायां श्रीश्रीदुर्गापूजायां, बेलुरग्रामस्य तत्सन्निहित-ग्रामान्तराणाञ्च समेऽपि जनाः निमन्त्रिताः आसन्। अनेन एतत्प्रान्तीयानां मठविषयकाः सर्वे सन्देहाः चिराय निवृत्ताः। ते सश्रद्धं सामोदं पूजां द्रष्टुं मठमागतवन्तः। तस्मिन् वर्षे दुर्गापूजानन्तरं यथास्मृति लक्ष्मीपूजा कालीपूजा च समाचरिता। इतःपूर्वं वराहनगरे मठस्य स्थितिकाले, इतःपरञ्च कतिषुचिद् वर्षेषु बेलुरमठेऽपि, प्रतिमायाः स्थाने घटं पटं वा प्रतिष्ठाप्य पूजा कृताऽभवत्। एतान् कांश्चन सन्दर्भान् विहाय, अद्यावधि प्रतिवर्षं हि बेलुरमठे, यथाविधि प्रतिमायां

दुर्गापूजानुष्ठानस्य परम्परा, प्रवर्तमाना विद्यते।

एकाशीत्युत्तराष्टादश-शततमं वर्षम्। श्रीभगवान् श्रीरामकृष्णस्तदानीं दक्षिणेश्वरम् अध्यात्मप्रभामण्डितं कुर्वन्, भवतारिणीमन्दिरम् अधितिष्ठति स्म। तस्मिन् वर्षे कैश्चिद् भक्तैः सम्भूय, श्रीभगवतः आविर्भावोत्सवः समायोजितः। नवनवत्युत्तराष्टादश-शततमवर्षे बेलुरमठस्यैव भूमौ ऐदम्प्राथम्येन श्रीरामकृष्णजन्ममहोत्सवः पालितः। मठस्य इतिवृत्तलेखेभ्यः इदमवगम्यते यत् तस्मिन्नवसरे न्यूनाधिकं पञ्चविंशति-सहस्र-जनाः उत्सवोद्यापनाय मठे समागताः इति।

आलम्बाजारे मठस्य स्थितिकाले योगानन्दस्वामिनो यत्नेन प्रथमतः, श्रीमातुः श्रीसारदादेव्याः जन्मतिथिं निमित्तीकृत्य, पूजाहोमादिकं प्रवृत्तम्। श्रीश्रीमातुः तिरोधानात् परं तस्याः जन्मतिथिमहोत्सवः समनुष्ठितो जातः बेलुरमठे अपिच बाग्बाजारस्थे श्रीमातृगृहे। ततः परस्मिन् वर्षे श्रीमातुः जन्मतिथौ, बेलुरमठस्थे यत्स्थाने तस्याः पूतशरीरम् अग्निसात्कृतम् तत्र, लघ्वाकारमपि चारुदर्शनमिदं मन्दिरं प्रतिष्ठापितम्।

स्वामिपादानाम् महासमाधेः परं तेषां जन्मोत्सवः बेलुरमठे प्रथमतः समनुष्ठितः। पञ्चाधिकोनविंशति-शततमवर्षे कोल्कत्तायाः विवेकानन्दसोसैटी इति संस्था, स्वामिपादानां जन्मतिथिम् उपलक्ष्य बेलुरमठप्राङ्गणे जनसभाम् आयोजितवती। तस्याः शोभां वर्धयन्नुपस्थाय भाषितवान् श्रीरवीन्द्रनाथठाकुरः।

श्रीभगवान्, श्रीमाता, स्वामिपादाश्चेति त्रयाणां वार्षिकजन्मतिथिमहोत्सवाः अद्यापि अनवरतम् अनुष्ठीयन्ते। रामकृष्णमठस्य रामकृष्णमिशनस्य च प्रत्येकं शाखाकेन्द्रेषु अगणितभक्तजन-निषेविताः ते दिवसाः, ईशरसास्वादनाय प्रकल्पिताः असुलभ-शुभावसराः कीर्त्यन्ते। श्रीदुर्गाकाल्यादिदेवतानां पूजापर्वाणि च बेलुरमठस्य बहुषु शाखाश्रमेषु यथाविधि आचर्यन्ते। किञ्च रामकृष्णसङ्घस्य सर्वेष्वाश्रमेषु प्रतिदिनं सायङ्काले, संन्यासिब्रह्मचारिप्रभृतिभिः

कृतं धर्मप्रवचनं शास्त्रपाठं श्रीरामकृष्णसारदाविवेकानन्द-साहितीविचारञ्च श्रोतुकामाः, बहवो भक्ताः जिज्ञासवश्च जनाः समागच्छन्ति। आश्रमेषु यथासन्दर्भं युवजनसम्मेलनम्, भक्तजनगोष्ठी इत्यादिकमपि समायोज्यते। इत्थं रामकृष्णसङ्घस्य आश्रमेषु प्रवृत्ताभिः नानाकर्मपरिपाटिभिः संयुक्ताः सन्तः साधारणजनाः नित्यनैमित्तिक-सामाजिकविषयेभ्य ऊर्ध्वमुत्थाय अतीन्द्रियार्थग्रहणाय सामार्थ्यम् अर्जयन्ति। एतदर्थं तेषां विशेषतः साहाय्यकरं भवति रामकृष्णाश्रमेभ्यो नानाभाषाभिः प्रकाशितं विपुलं ग्रन्थसर्वस्वम्, अपिच काले काले वितीर्णं पत्रपत्रिकाजातम्।

बेलुरमठस्य पूजामहोत्सवादि-सन्दर्भेषु आमोदवर्धको भवति खेचरान्नप्रसादः। मठस्य शाखाकेन्द्रेष्वपि इयमेव वस्तुस्थितिः। इदानीं बेलुरमठस्य सर्वेषु उत्सवेषु लक्षशो जनाः समायान्ति। सर्वेषामपि दर्शनार्थिनां प्रसादप्राप्तिः येन स्यात्, तद्विषये मठाधिकारिणः सदा जागरूकाः सन्तीति किमु वक्तव्यम्। भगवत्सेवया तादात्म्यमापन्नः अयं भक्तसेवायज्ञः निर्विघ्नं सुसम्पन्नो भवेदिति, बेलुरमठस्य सुविशाला पाकशाला आधुनिकप्रयुक्तिसंयोजनेन सन्नद्धा कृतास्ति।

अयमस्ति विवेकानन्दस्वामिचरणानां विशुद्धमनोमुकुरे स्फूर्तः असौ वेदविद्यालयः। महासमाधेः कतिपयहोराभ्यः पूर्वमपि स्वामिपादाः वेदाध्ययनस्य विषये, वेदविद्यालयस्य आवश्यकतायाः विषये च उक्तवन्तः। प्राचीनां गुरुकुलशिक्षापद्धतिम् अनुकृत्य वेदविद्यालयस्यास्य व्यवस्थापना कृता वर्तते। अत्र संस्कृतभाषामाध्यमेन व्याकरणम्, काव्यम्, अलङ्कारशास्त्रम्, स्मृतिः, भक्तिशास्त्रम्, दर्शनम् इत्यादिविषयाः पाठ्यन्ते। एतदतिरिच्यापि सङ्गणकादिविज्ञानम् आङ्गलभाषा च अध्याप्येते॥

श्रीमान् शरच्चन्द्रचक्रवर्त्ती अलिखत्—“स्वामिपादेषु मठम् अधिवसत्सु, काले काले गीता, भागवतम्, उपनिषद्, ब्रह्मसूत्रभाष्यम् इत्येषाम्

आलोचना भवति स्म। स्वामिपादाः अपि प्रायेण प्रतिदिनं तत्रोपस्थाय अस्माकं प्रश्नान् मीमांसापूर्वकं समादधति स्म। तेषां शासनं शिरसा वहन्तः समेऽपि तत्प्रवर्तितनियमानुसारं प्रवर्तन्ते स्म" इति। अद्यापि मठवासिनां संन्यासिब्रह्मचारिणाम् आह्निक-जप-ध्यान-शास्त्राध्यायन-सेवा-भोजन-निद्रादिसहिता दैनन्दिनकर्मसूचिः, नियमैः सुनिबद्धां तामेव पद्धतिम् अनुवर्त्य प्रवर्तते।

रामकृष्णमठस्य रामकृष्णमिशनस्य च कर्मप्रणाल्याः मूलस्थानरूपेण बेलुरमठे स्थिरीकृते जाते, तत्र विशालाकारस्यैकस्य श्रीरामकृष्णमन्दिरस्य निर्माणम् अपरमेकं प्रधानं कार्यं समापतितम्। यः सर्वधर्मसमन्वयस्य समुद्गाता, तदीयं मन्दिरमपि सर्वधर्मस्थापत्यसौन्दर्यस्य समवायाज्जातमेकं सन्दृश्यशिल्पं भवतु इत्यासीत् स्वामिपादानां मतिः। तमिमं चारुसङ्कल्पम् अनुसृत्य विज्ञानानन्दस्वामी तिस्रः रेखाकृतीः विलिख्य सज्जीकृतवान्। तासु अन्यतमां स्वामिपादाः अनुमोदयामासुः। परवर्तिनि काले बेलुरमठस्य श्रीरामकृष्णमन्दिरम् इमामेव रेखाकृतिम् अवलम्ब्य विनिर्मितम्। अस्य मन्दिरस्य ईदृशी स्थापत्यशैली विश्वैकायनभावनायाः कश्चन अभिनवः प्रकाशो वरीवर्ति।

प्राचीनमन्दिराणां मस्जिदानां क्रैस्त-प्रार्थनागाराणां बौद्धमठानाञ्च आकारसमन्वयः श्रीरामकृष्णमन्दिरस्यास्य स्थापत्ये वयम् अवलोकयामः। अस्य मुख्यं प्रवेशद्वारं साञ्चीस्तूपस्य रूपम् अनुकरोति। एतस्योपरि स्वामिपादप्रणीतं रामकृष्णसङ्घस्य प्रतीकम् उत्कीर्णं वर्तते। अस्य शीर्षभागे वङ्गीयया अष्टचालाकृत्या सम्मिलिता मुघल-राजपुत्र-शैली दृश्यते। नाट्यमन्दिराख्यः प्रार्थनागारस्तु बौद्धचैत्यगृहमनुकृत्य निर्मितः। सर्वेऽपि स्तम्भाः कारुकौशलैः चारु खचिताः। गर्भगृहं परितः नवग्रहमूर्तयः शोभन्ते। देशविदेशयोः प्राचीनानां बहूनां धार्मिकसौधानां स्थापत्यसौष्ठवम् अत्र समुपस्थितम्।

गर्भगृहस्य केन्द्रस्थले, प्रस्फुटितश्वेतपद्मासने समाधिमास्थाय

सुखासनोपविष्टस्य भगवच्छ्रीमकृष्णस्य नयनाभिरामा श्वेतदृषन्मयी ध्येयमूर्तिः। अस्याः अभिव्यक्तिमकरोत् त्वष्टा श्रीगोपेश्वरपालः। विग्रहाधारभूतायाः श्वेतशिलामय्याः वेद्याः त्रिषु मुखेषु परमहंसप्रतीकम् अङ्कितं विद्यते, यस्य रेखाकृतिं कृतवान् श्रीनन्दलालवसुः।

अर्थाभावात्, स्वामिपादानां महासमाधेरपि त्रिषु वर्षदशकेषु समाप्तेषु श्रीरामकृष्णमन्दिरस्य निर्माणं बेलुरमठे आरब्धम्। अस्मै कर्मणेऽपि अर्थसाहाय्यं प्रदत्तवत्यौ द्वे अमेरिकादेशीये श्रीरामकृष्णभक्ते—सुश्रीः हेलेन्-रुबेल्, अपिच श्रीमती अन्ना वुय् स्टर्। इमे श्रीरामकृष्णभक्तनिलये यथाक्रमं भक्तिरिति, अन्नपूर्णेति च प्रसिद्धिं गते।

अष्टत्रिंशदधिकोनविंशति-शततमवर्षे दर्शनीयस्यास्य श्रीरामकृष्ण-महामन्दिरस्य प्रतिष्ठाकर्म सम्पन्नम्। रामकृष्णसङ्घस्य तत्कालीनः अध्यक्षः श्रीविज्ञानानन्दस्वामी पूर्वतनमन्दिरात् आत्मारामकलशम् आदाय नवमन्दिरे स्थापयामास। ततःप्रभृति प्रतिदिनम् देशीयाः विदेशीयाश्च असङ्ख्याः जनाः स्थानमिदं भजन्ते। युगावतारम् उपास्य, युगधर्मञ्च उपश्रुत्य ते, शान्तिं शक्तिं प्रचोदनञ्च उपलभ्य इतो निवर्तन्ते।

वयमत्र बेलुरमठे, विश्वैकायन-विभावनस्य अथवा विश्वैकनीडदर्शनस्य स्फुरणं, न केवलं महामन्दिरस्य स्थापत्यशैल्याम् वीक्षामहे, अपितु एकैकस्मिन्नपि कर्मणि प्रतिपद्यामहे। बेलुरमठस्य दैनन्दिनपूजासम्बद्धेषु कृत्येषु सायङ्कालीनो नीराजनविधिः अपूर्वशोभान्वितः समेषां द्रष्टॄणां नयनानन्दनोऽस्तीति नितरां प्रसिद्धम्। आरतिः इति ख्यातमिदं नीराजनकर्म यदा भगवच्छ्रीरामकृष्णस्य पुरस्तात् सभक्तिश्रद्धम् अनुष्ठीयते तदा, संन्यासिब्रह्मचारि-भक्तजनशतैः समवेतकण्ठं सवाद्ययन्त्रं भावगम्भीरमेकम् आरात्रिकगीतम् आलप्यते।

खण्डन भवबन्धन, जगवन्दन, वन्दि तोमाय—हे भवबन्धनस्य खण्डयितः, जगद्वन्दित, त्वां वन्दे। संस्कृतपदबहुलं श्रीवङ्गभाषीयमिदम् अनुपमगीतं

श्रीमद्विवेकानन्दस्वामिपादैः प्रणीतम्। स्वामिपादाः पुरा, श्रीरामकृष्णस्य जन्मतिथौ सायंसन्ध्याकाले गीतमीदं गायन्तः, परमहंसभगवतः सविधे नीराजनम् अकुर्वन्। हिन्दुस्थानसङ्गीतशास्त्रानुसारं यमनकल्याणरागेण रञ्जितं, चौतालेन निबद्धमिदं ध्रुपदगीतं, प्राच्यपाश्चात्त्यैः वाद्योपकरणैः सह, समवेतकण्ठमुच्चैः यदा गीयते, तदा सङ्गीतानुरागिणां हृदयेषु तत्, विश्वसङ्गीतविन्यासस्य सान्द्रानन्दलहरीः समुत्सृजति।

स्थापत्यं, सङ्गीतम् इत्यादिविषयाद् अन्यत्रापि, श्रीरामकृष्ण-नामाङ्कितस्य युग्मसङ्घटनस्य परिचालनार्थं, सर्वलोकानुग्राहकं प्रकर्षं प्रति तस्य प्रक्रमणार्थञ्च, विवेकानन्दस्वामिचरणैः यादृशः पथनिर्देशः कृतः, तस्मिन्नपि परिहृतनिखिलभेदभावं विश्वैकायनदर्शनं स्फुटतरं विभाति।

यतोहि, श्रीसारदारामकृष्णौ वैचित्र्यचित्रितस्य समस्तस्यापि द्वैतप्रपञ्चस्य निर्विशेष-शाश्वताधिष्ठानं उपनिषद्भिरुद्गीतम् अद्वैतसत्यम् आत्मस्वरूपमेवेति साक्षात्कृत्य, श्रीमद्विवेकानन्दमुख्यान् स्वशिष्यानपि तेनैव परविद्यामृतेन परिप्लाव्य कृतार्थान् कृतवन्तौ। अतएव तेषां श्रीसारदारामकृष्णचरणसेविनां समस्तलोकोपकारिणां यतिराज्यराजन्यानां मुक्तिलक्ष्मी-मूर्धन्यमकुटमणीनां नररूपनारायणोपासकानां नररूपधारिणामीश्वराणां, गुरुशास्त्रतात्पर्यतत्परेषु विशदवृत्तिषु चित्तेषु न किञ्चिद् अविद्यालवलाञ्छनमपि सम्भावयितुं शक्यते। तेषां वसुधैवास्ति कुटुम्बकम्। समग्रविश्वम् स्वात्माधिष्ठितमेकं रम्यहर्म्यम्। आत्मानन्यमेव अखिलम् इति हि रामकृष्णसङ्घस्य आदर्शभूतो राद्धान्तः। तदुक्तं श्रीमात्रा श्रीसारदादेव्या—न कोऽप्यपरो विद्यते, जगदिदं तवैव इति।

शताधिकवर्षेभ्यः पूर्वं, कोल्कत्तावास्तव्यो नरेन्द्रनाथदत्तः इति युवा श्रीरामकृष्णपरमहंसस्य वचनेषु अनितरोक्तिगोचरं यम् अर्थाविष्कारम् अवाप, तदर्थप्रापकं हि पन्थानं समस्तजनसमुत्कर्षाय हितम् स समुद्घाटयामास स्वयं विवेकानन्दो भूत्वा। सोऽयं पन्थाः भवति त्यागस्य सेवनस्य च। सोऽयम्

आत्मविश्वासस्य पन्थाः, आत्मावलम्बनस्य पन्थाः, आत्माविष्करणस्य पन्थाः। औपनिषदम् आत्मानम्, आत्मबलेन अवगन्तुम्, अस्माभिराश्रयणीया वितता वीथिरियम्।

रामकृष्णमिशनस्य पञ्चविंशत्यधिकशतवर्षपूर्त्यवसरेऽस्मिन्, इह बेलुरमठे प्रयतप्रवाहायाः भागीरथ्याः तीर्थतटं प्राप्य वयम् अद्यापि, श्रीमत्स्वामिचरणैः मुक्तहस्तं निरभिसन्धि समेभ्योऽपि सततं वितन्यमानां तां श्रीरामकृष्ण-वचोमुक्तार्थसम्पदं प्रतिपद्यामहे। आकल्पान्तम् अनुवर्तनीयेऽस्मिन् अनुत्तमधर्मे श्रीसारदारामकृष्णविवेकानन्दादिपरम्परया लब्धदीक्षाश्च बहवो भाग्यवन्तः, समुपात्तलोकशुश्रूषारम्भाः, जीवशिवाराधनेन आब्रह्मस्तम्बपर्यन्तम् आत्माद्वैतं मनसा वचसा कर्मणा चाविर्भावयन्तः, परमार्थालोकं व्यवहारतलमानयन्ति विदितवेदान्तवेद्याः महान्तः।

# ब्रह्मानन्दषट्कम्

डॉ. गोपीकृष्णन्-रघुः*

जन्मान्तरे केशवसङ्गजातां
मुमुक्षुतामाप्य गुरुं प्रपन्नम्।
गोपालकं कृष्णसखं वरेण्यं
नमामि तं ब्रह्मयतीन्द्रवर्यम्॥१॥

श्रीरामकृष्णस्य तनूजकल्पं
विवेकसूर्यस्य तु चन्द्रकल्पम्।
सतीर्थवर्गस्य नरेशकल्पं
नमामि तं ब्रह्मयतीन्द्रवर्यम्॥२॥

तपस्विनं तप्तजनाभ्रतुल्यं
शिष्यान्वयस्यादिमधूर्वहं वै।
राजाह्वयं रत्नकिरीटवर्जं
नमामि तं ब्रह्मयतीन्द्रवर्यम्॥३॥


असङ्गमप्यद्भुतसङ्घदक्षं
कर्मक्षमं कर्मविलेपहीनम्।
चक्रध्वजं चक्रविनाशहेतुं
नमामि तं ब्रह्मयतीन्द्रवर्यम्॥४॥

मुक्तोऽपि कारुण्यविशेषहेतोः
जगद्धितेष्वत्यधिकं रमन्तम्।

* सहायकाध्यापकः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध-संस्थानस्य, बेलुडमठस्य।

सङ्घस्य मुख्यं प्रथमं प्रधानं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥५॥

चक्राङ्किते मन्दिरसव्यभागे
गङ्गातटे मातुरतीवपार्श्वे ।
भव्यालये केशवपार्श्वसंस्थं
नमामि तं ब्रह्मयतीन्द्रवर्यम् ॥६॥



[बेलुडमठे स्वामिब्रह्मानन्दमन्दिरे स्वामिब्रह्मानन्दस्य चित्रम्]

# सङ्घगुरुः स्वामी ब्रह्मानन्दः

ब्रह्मचारी ईशानचैतन्यः*

ॐ ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि॥

संसारार्णवघोरे यः कर्णधारस्वरूपकः।
नमोऽस्तु रामकृष्णाय तस्मै श्रीगुरवे नमः॥

अवतारः यदा मर्त्यभूमिम् अवतरति, तेन सह तस्य लीलापार्षदाः अपि आगच्छन्ति। तद्वत् श्रीश्रीरामकृष्णदेवेन सह तस्य मानसपुत्ररूपेण ब्रह्मानन्दमहाराजस्य अपि आगमनं जातम्। तस्य नाम आसीत् राखालमहाराजः। श्रीश्रीठाकुरः तं राखाल इत्येव नाम्ना आह्वयति स्म। एकदा श्रीरामकृष्णः भावावेशेन अपश्यत् यत् श्रीश्रीमाता जगदम्बा एकं बालकम् आनीय तस्य क्रोडे स्थापयन्ती तम् अवदत्—“तव पुत्रः”। पुत्र इति नाम्ना सशङ्किते जाते सति, श्रीश्रीजगन्माता तम् आश्वस्य उक्तवती—“न तु साधारणपुत्रः इव। एष तु तव मानसपुत्रः।” श्रीरामकृष्णस्य बालकभावविशिष्टेन श्रीराखालेन सह वात्सल्यरसास्वादनस्य अद्भुता इयं लीला। परवर्तिनि काले राखालस्य आगमनात् पूर्वं श्रीश्रीठाकुरस्य भावावेशेन दर्शनं जातम्—“गङ्गायां शतदलपद्मोपरि, भगवता श्रीकृष्णेन सह कश्चन तादृशः बालकः तस्य करं धृत्वा नृत्यति”।

---

* रामकृष्णमिशन्-विद्यामन्दिरस्य, बेलुडमठस्य।

इदानीं राखालस्य दर्शनात् तादृशी कथा मनसि समुदिता सती राखालं चिह्नितवान् सः अन्तर्यामी भगवान् श्रीरामकृष्णः। यत्—“सोऽयं राखालः”।

“कालिन्दीफुल्लकमले माधवेन क्रीडारतः।
ब्रह्मानन्द नमस्तुभ्यं सद्गुरो लोकनायक॥”

श्रीमत्स्वामिविवेकानन्दमहाराजः यथा श्रीरामकृष्णसङ्घे अस्मासु, ‘स्वामीजी’ इति नाम्ना प्रसिद्धः, तद्वत् श्रीमत्स्वामिब्रह्मानन्दमहाराजोऽपि ‘राजामहाराजः’ वा ‘महाराजः’ वा इति नाम्ना सुपरिचितः। श्रीरामकृष्णमठप्रतिष्ठान्तरं स्वामीजी अस्य सङ्घाध्यक्षपदं ब्रह्मानन्दमहाराजाय समर्पितवान्। श्रीश्रीठाकुरस्य उक्तिरासीत्—“सम्पूर्णमेकं राज्यं परिचालयितुं समर्थः राखालः। स्वामीजी उक्तवान्—“अस्मासु राखालः आध्यात्मिकमार्गे अस्मत् सर्वेभ्यः गरिष्ठः”। महाराजस्य सङ्घाध्यक्षकाले सा उक्तिः प्रमाणिता जाता इति दरीदृश्यते।

सङ्घगुरुः वस्तुतः श्रीश्रीरामकृष्णदेवस्य अन्या गुरुमूर्तिः। गुरुशक्तिः शिष्यान् सदैव रक्षति। गुरुभाव ईश्वरस्य एव भावः। अज्ञानमोहाविष्टं जीवं संसारदुःखात् त्रातुं तथा शान्तिं प्रदातुं च भगवन्तं विना सामर्थ्यं कस्य विद्यते! करुणाद्रस्य भगवतः तादृशी उद्धारकारिणी मूर्तिरेव गुरुमूर्तिः।—“तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये”।

तस्मात् अवताराः एव यथार्थगुरवः। गुरुः बृहस्पतिः। गुरुरेव ब्रह्मा, विष्णुः, महेश्वरश्च, साक्षात् ब्रह्म एव।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः॥

अवतारवरिष्ठः तथा आचार्याणामपि महाचार्यः श्रीरामकृष्णदेवः तादृशः गुरुमूर्तिः। तस्य कृपया जनाः त्वरितं शोकं तीर्त्वा अमृतत्वं प्राप्नुवन्ति। तस्य मानसपुत्रः ईश्वरकोटी राखालमहाराजोऽपि लोकशिक्षार्थं तेनैव चिह्नितः। तादृशी

गुरुशक्तिः पितुः पुत्रे सञ्चारिता। सुदीर्घं कालं यावत् अस्माद् गुरुशक्तिबलात् सः सङ्घं परिचाल्य, तया गुरुशक्त्या सङ्घशरीरं पुष्टीकृतवान्।

महाराजविषये तस्य गुरुभ्रातृणां मतं कीदृशम् आसीत् इति किञ्चित् उल्लेखं करोमि।

स्वामी प्रेमानन्दमहाराजः अपर्णानन्दमहाराजम् उक्तवान् यत् "महाराजः श्रीश्रीठाकुरस्य मानससन्तानः, तस्य अपरञ्च रूपम्। तस्य कृपाप्राप्तिः यदि भवेत् जानीयात् श्रीश्रीठाकुरस्य कृपा एव प्राप्ता" इति।

तद्वत् वाक्यं स्वामी शिवानन्दमहाराजः अपि उक्तवान्। कथितञ्च—"श्रीश्रीठाकुरस्य आध्यात्मिकशक्तिः महाराजमाध्यमेन सम्पूर्णं जगत् इदानीं लभते।

एकस्मिन् पत्रे स्वामिरामकृष्णानन्दमहाराजेन उक्तं—यः कोऽपि परमपूज्यपादानां श्रीमत्स्वामिब्रह्मानन्दमहाराजानां चरणयोः शरणागतत्वं प्राप्तवान्, स इह जीवने एव आत्मदर्शनं भगवद्दर्शनं च कृत्वा कृतार्थः भविष्यति इति मे निश्चया मतिः।

श्रीमत्सारदानन्दस्वामिपादः अवदत्—अस्मासु महाराजस्य एव चलने वदने च सर्वावस्थायां श्रीश्रीठाकुरस्य परमहंसावस्थायाः भावादिकं परिलक्ष्यते।

भोः मान्याः, महाराजमाध्यमेन श्रीश्रीरामकृष्णदेवस्य शक्तिः कथं प्रसारिता जाता इति विषये एकां घटनां संक्षेपेण वदामि। स्वामिनिर्वाणानन्दमहाराजेन कथितमिदम्। स्वामिसारदानन्दमहाराजेन प्रत्यादिष्टा एका बालिका महाराजदर्शनार्थं बलराममन्दिरम् आगता। तदा महाराजः विश्रामं लभते स्म। व्याकुलहृदया सा महाराजस्य दर्शनम् इष्टवती। तदा सेवकेन संवादः प्रेषितः। महाराजः ताम् आहूतवान्। महाराजं प्रणमन्ती सा रुदितवती। न्यवेदयत् तस्याः वेदनावार्ता—सा, चतुर्दशवयःकाले कृतविवाहा। सप्ताहद्वयात् परं तस्याः पतिः स्वर्गतः। तदा वर्षात्मकं कालं यावत् सर्वदा शोकेन रुदितवती सा

भगवत्समीपे प्रार्थनां कृत्वा दिवसं यापयति स्म। एकवत्सरानन्तरं श्रीश्रीठाकुरः तत्समीपे प्रकटीभूय तामुक्तवान्—"मा रोदिसि! मम पुत्रः राखालः वाग्वाजारे तिष्ठति। तन्निकटं गच्छ। सः अवश्यं सहायतां करिष्यति"। तर्हि सा महाराजस्य दर्शनाय आगता।

तद्दिने सा घटिकाद्वयं यावत् महाराजसमीपे यापितवती। महाराजः कृपापूर्वकं तस्यै मन्त्रदीक्षां दत्तवान्। अतः तस्याः शोकभारः लाघवः जातः।

गुरुविषयके प्रबन्धे राजामहाराजेन निगदितं—"ब्रह्मवित् गुरुः शक्तिसञ्चारपूर्वकं मन्त्रं दत्वा शिष्यस्य आध्यात्मिकपन्थानं सुगमं करोति। यावत् शिष्यः ज्ञानं न लभते तावत् गुरुः तत्कृते वर्तमानः भवति। शिष्यस्य कृते गुरुः ब्रह्मप्राप्तः अपि मध्ये मध्ये स्वात्मानं प्रकटयति अपि।

तादृशः सामर्थ्यवान् गुरुः आसीत् अस्माकं महाराजः। स्पर्शशक्त्या एव देवेन्द्रनाथवसुमहोदयस्य मध्ये परिवर्तनं साधितवान् सः। अधिकं किं वदामि! स्पर्शव्यतिरेकेण केवलम् इच्छाशक्त्या एव अपरस्मिन् धर्मभावजागरणाय समर्थः आसीत्। भक्तप्रवरः श्रीगिरिशचन्द्रोऽपि एकदा चित्तचाञ्चल्येन भक्तिभावस्य किञ्चित् न्यूनतां अनुभवति स्म। तदा तस्य मनसः परिस्थितिः भयङ्करा आसीत्। तत् सम्यक् कर्तुं सक्षमः कोऽपि नासीत्। तदा राजामहाराजः तम् आश्वस्य उक्तवान्—"मा भीष्ट! चिन्ता मास्तु। यथा तरङ्गः कदाचित् उपरि गच्छति, ततःपरम् अधः आगच्छति तथाहि, भवतः मनः अपि। तत्कृते चिन्ता न करणीया। एतत् भवन्तं झटिति उच्चावस्थां प्रापयिष्यति।

इत्युक्त्वा यदा राजामहाराजः गच्छन् आसीत्, तत्क्षणमेव गिरिशस्य मनः पुनः पूर्ववत् सम्यक् भक्तिमण्डितं जातम्। एतादृशी इच्छाशक्तिः महाराजमध्ये सर्वदा क्रीडति।

मन्त्रदीक्षातः पूर्वं महाराजः परीक्षां कृत्वा शिष्यरूपेण गृह्णाति स्म। किन्तु श्रीश्रीमाता सारदादेवी एकदा उक्तवती—"किं करोति राखालः? सः इदानीं दीक्षां

न ददाति!" अधिकन्तु श्रीरामानुजाचार्यस्योपरि यात्राभिनये तस्य आचण्डालं कृपावितरणं दृष्ट्वा महाराजस्य मनः अपि करुणार्द्रं जातम्। एतद्घटनाद्वयस्य अनन्तरं सः दीक्षाविषये उदारभावम् अवलम्बितवान्। एकदा दीक्षाप्रदानात् परम् तेन कश्चन शिष्यः भाषितः—"यः कोऽपि वा आगच्छतु नाम, तस्मै एव दीक्षां प्रदास्यामि। अनया तस्य मङ्गलम् अवश्यं भविष्यति"।

केवलं कृपां कृत्वा एव न विरमति सः। साधकं तत्कृपाधारणे योग्यं कर्तुं प्रयतते अपि। तेन गदितम्—"गुरुस्तु कृपां कृतवान्। भगवत्कृपया सदिच्छापि जागृता, साधुसङ्गः अपि जातः। इदानीं स्वस्य मनसः कृपा एव अपेक्षणीया"। एतादृश्या प्रक्रियया सः शिष्यं प्रबोधयति स्म। शास्त्रे उक्तं—मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः च इति एतत्त्रयं मुक्तिलाभे आवश्यकम्। सद्गुरुणा श्रीमद्ब्रह्मानन्दमहाराजेन एतद्दूरपर्यन्तम् उक्तं यत्—"साधनमार्गे पुरुषकारः आवश्यकम्। किञ्चित् साधनं कुरु। न्यूनातिन्यूनं चतुर्वत्सरं यावत् कुर्यात्। यदि किमपि न अभविष्यत्, तर्हि मम कपोले चपेटिकामेकाम् अदास्यत्।" किन्तु तस्य प्रयोजनं नास्ति, यतो हि तस्य श्रीमुखाद् निःसृतं वाक्यं कदापि अन्यथा भवितुं नार्हति।

श्रीमत्स्वामिसारदानन्दमहाराजेन उक्तं—"महाराजः आसीत् अस्माकं परिचालकः। न तु मठाध्यक्षपदस्य कर्तृत्वशक्तिद्वारा, अपि तु प्रेमशक्तिद्वारा"।

वस्तुतः जीवनस्य बह्व्यः समस्याः जपादिना प्रार्थनया च दूरीकर्तुं शक्याः—इति महाराजमतम्। काशीस्थितयोः अद्वैताश्रमसेवाश्रमयोः मध्ये विवादः तेन दूरीकृतः अनेन ध्यानजपादिमार्गेण। तादृशस्य दिव्यपुरुषस्य महाराजस्य उपस्थित्या आध्यात्मिकतया च सर्वेषां मनः उच्चमार्गं स्वयमेव प्रधावति स्म।

शाश्वतगुरुशक्तेः अदृष्टपूर्वः विकाशः परिलक्ष्यते महाराजस्य जीवने। एकदा गुरुभावभावितः सः आश्वासितवान्—"अस्मिन् जगति कस्यापि साध्यं नास्ति गुर्वाश्रितस्य शिष्यस्य अनिष्टकरणे। जीवने यावन्न ईश्वरदर्शनं जातम्, तावता

बह्व्यः त्रुटयः भवितुमर्हन्ति। किन्तु गुरुम् आश्रित्य यदि कोऽपि तिष्ठेत्, तस्य कृते प्रमादसम्भावना नास्ति एव। सद्गुरोः आश्रयः येन प्राप्तः, तेन तदाश्रयम् अवलम्ब्य यदि स्थीयते, तदा गुरुरेव तेषां अज्ञानं दूरीकर्तुं समर्थः"। चिन्ता मास्तु।

एतादृशं दिव्यघटनाबहुलं जीवनम् अस्माकं प्रियस्य पूज्यस्य महाराजस्य। सङ्घगुरुरूपेण तस्य महती कृपा सङ्घस्य सर्वासु दिक्षु प्रसारिता। सा कृपा गङ्गाधारावत् अद्यापि प्रवाहिता च। अस्माकं केवलं कर्तव्यम्—श्रद्धा। गुरुवाक्येषु विश्वासः, विश्वासः, विश्वासश्च एव। श्रीमद्ब्रह्मानन्दमहाराजेन उक्तं—"गुरुवाक्ये विश्वासं कृत्वा तिष्ठ केवलम्। गुरुकृपया सर्वं भविष्यति, न संशयः। गुरुवाक्ये विश्वासः यदि न स्यात्, तर्हि केवलेन मन्त्रेण किमपि भवितुं नार्हति। मार्जारशावकः इव तिष्ठ। यदा प्रयोजनं भविष्यति, तव माध्यमेन गुरुः सर्वं कारयिष्यति। किं वा जानासि स्वयम्? तस्योपरि भारं प्रत्यर्प्य तिष्ठ। यस्मै भारः न्यस्तः, तस्य दायित्वज्ञानमस्ति। सः तव विषये त्वत्तः अधिकं चिन्तयति। सः सर्वविपदः त्वां रक्षयिष्यति"।

मुण्डकोपनिषदि आम्नातं—"तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः"। अयि माननीयाः, आगच्छन्तु, शरणागता वयं तं सङ्घगुरुं शिरसा नमामः, प्रार्थयामश्च—अस्माकं सर्वेषामुपरि तस्य कृपाभागीरथी सर्वदा प्रवहतु। तस्य पुण्यजीवनस्य अनुस्मरणेन सभक्तिमुक्तिं श्रीरामकृष्णपदं प्राप्स्यामः इति प्रार्थना परमपूज्यपादानां श्रीमत्स्वामिब्रह्मानन्दमहाराजानां चरणकमलयोः।

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः॥

ॐ

# स्वामिविवेकानन्दस्य मन्दिरस्थापनाय आह्वानम्

अनुवादकः– शाश्वत-झा*

स्वामीविवेकानन्दस्य भाव्यर्धशतवार्षिकजन्मतिथिः

द्वादशोत्तरैकविंशतिवर्षस्य जनवरीमासस्य एकादशतमे दिनाङ्के कालचक्रम् आधुनिकसमयस्य मानविकतयाः महाशिक्षकस्य स्वामिविवेकानन्दः इति जगति प्रसिद्धस्य मर्त्यदेहं प्रविश्य पूर्णतया पञ्चाशद्वर्षाणि अनन्ततां प्रति भ्रमितं स्यात्। यद्यपि स्वामीविवेकानन्दः ऊनचत्वारिंशे वयस्येव महासमाधौ स्वशरीरमत्यजत् तथापि अचिरप्राप्तसाधनाफलद्वारा अस्मदीयधर्मेतिहासे स्वामरकीर्तिं प्रत्यष्ठापयत्। अस्माकं दृष्टौ स आधुनिकभारतस्य देवदूतः प्रतितिष्ठति। तादृशभाविभारतमातुः या धर्मस्य मातृरूपा या च “यद्यत् पवित्रं नैतिकम् आध्यात्मिकं वा विद्यते तन्मातृत्वेन स्थिता”। न तु तादृशभारतस्य यो विजातीयक्षणिकवस्तुवादिविचारधारायाः सभ्यतायाश्च सूक्ष्मतां पोषयन् मत्तहस्तिरिव प्रवर्तते। भारतस्य या वार्ता स्वामिपादैः स्वदेशे प्राच्ये च प्रसारिता तदधुना स्वयोग्यस्थानं प्राप्नोतीत्यस्य आनन्दास्पदं चिह्नमिदम्। यतो हि तया स्वदेशे धार्मिकचेतना जागृता पाश्चात्यदेशेषु च विचारधाराः नूतनमार्गेषु सञ्चारिताः। प्रत्येकं भारतीयः पाश्चात्यजगतः पुरतः स्वमातृभूमेः सम्मानं वर्धितवतः स्वामिनः विषये गर्वं करोति। तथा च प्रत्येकं पाश्चात्यः यः तस्य पुण्यचरितस्य सान्निध्यमप्राप्नोत् अथवा अस्माकमुदात्तदर्शनस्य शिक्षा स्वामिनां

* विद्यार्थी, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

प्रकाशितग्रन्थमाध्यमेन अप्राप्नोत् सः तस्मात् कृतज्ञतायाः तादृशम् ऋणं धारयति यत् न केनचित् पथा प्रत्यर्पयितुं शक्नुयात्।

स्वामिनां महासमाधेः दशवर्षाः तथैव अकस्मात् अतीताः यथा समाधेः दशवर्षपूर्वं ते आत्मप्रत्ययसमन्विताः धर्ममहासभायाः पुरस्तात् उपस्थिताः आसन्। भारतवर्षेण तस्य महायशसः पुत्रस्य महाप्रस्थानं राष्ट्रियदुर्दैवत्वेन अनुभूय अदृष्टपूर्वेण दुःखेन भक्त्या च तत् प्रकाशितम्। परन्तु आधुनिकभारतस्य देशभक्तर्षेः कीर्तिसंरक्षणार्थमस्माभिः किं वा कृतम्? रामकृष्णमिशन् हाउडाजनपदस्थे बेलूडमठनामकस्वमुख्यकार्यालयभूमौ पवित्रगङ्गातीरे स्वामिनां मन्दिरस्थापनमार्गेण इदं कर्तुमिच्छति। स्वामिवराणां जीवावशेषाणां वाहकं मन्दिरमेकं विहाय एकं वैदिकविद्यालयम्, एकं ग्रन्थालयं यस्मिन् प्राच्यपाश्चात्य-धार्मिक-दार्शनिकग्रन्थाः भवेयुः, तथा पूर्वोकतविषयेषु चर्चार्थम् एकं सभामण्डपञ्च स्वाच्छादने दधिष्यते। अस्मिन् प्रसङ्गे अस्माभिः भारतीयमित्रेभ्यः प्रशंसकेभ्यः तथा प्राच्यवेदान्तसंघेभ्यः च प्रेषितानां अनौपचारिकपत्राणां प्रत्युत्तरत्वेन या धनराशिः अस्माभिः प्राप्ता तया मन्दिरस्थमृत्तिकाचयस्य तथा प्राकारमूलस्यापि पूर्णतया निर्माणं कष्टेन सम्पादितम्। तस्मात् केवलं मितपटलाच्छादितः एकप्रकोष्ठः एव स्वामिनां दाहसंस्कारस्थले तच्चिह्नत्वेन तिष्ठति तथा च स्वामिनां जीवावशेषाः अचिरेण मठस्थदेवालये वर्तन्ते। तस्मादिदमसम्पूर्णं निर्माणं यदर्थं परिकल्पितं तद्भिन्नतया भारतस्य पुत्राणां लज्जायाः असामर्थ्यस्य च स्मारकत्वेन तिष्ठति। किन्न वयमर्हामः उद्यमेन एनं कलङ्कास्पदं दूरीकृत्य भारतवर्षः अधुनापि निजदेवदूतान् सम्मानयितुं शक्नोतीति निदर्शयितुम्?

एतस्य लक्ष्यस्य साधनाय, यदर्थं वर्तमानगणनानुसारं त्रिंशत्सहस्ररूप्यकाणि अपेक्षितानि, सर्वतः प्रायोगिकमेकमुपायम् अस्माकं पुरतः प्रकटितं वयमस्माकं पाठकानां पुरतः तेषामनुमोदनार्थम् उपस्थापयामः। यः कोऽपि स्वामिनः

विषये तेषां कार्यविषये च आत्मानं साक्षात् परम्परया वा अधमर्णं मनुते सः इदं धार्मिकव्रतं स्वीकुर्यात्, यत् स्वामिनां पञ्चाशत्तमजन्मतिथौ स्वोपार्जनस्य पञ्चांशस्य एकः भागः प्रतिमासं गुरुदक्षिणात्वेन पृथक् स्थाप्य अधोहस्ताक्षरिताय मायावतिस्थिताद्वैताश्रमाध्याक्षं स्वामिविरजानन्दाय वा, प्रतिमासं वा १९१२ तमवर्षस्य अन्ते वा स्वानुकूल्येन सम्प्रेषयतु इति। तथा च सर्वेऽपि प्रकाशनकेन्द्राः वेदान्तसंघाः विवाकानन्दसङ्गोष्ठयः ये सामाजिकाः मिशन्पृथग्भूताः स्वामिनां नाम्नि अर्थव्यवसायं कुर्वन्तो वर्तन्ते तेऽपि समानमेव कार्यं कुर्युः इति सम्प्रार्थ्यन्ते। इयमेव व्यवस्था पूर्वोक्तसंस्थाभिः स्वामिनः जन्मदिनाचरणाय सङ्कलितस्य धनस्य विषयेऽपि भविष्यति। अनेन सरलक्रमेण कस्यचिदपि साधनेषु महच्छुल्कोपादनमकृत्वैव तत्स्मारकमन्दिरशृङ्गशिखरं उन्नताकाशे पवित्रगङ्गातटे भारतस्य स्वदेशप्रीतेः धार्मिकचेतनायाश्च निदर्शनत्वेन स्वमस्तकमुन्मन्चयिष्यति। इयं भावना कस्य वा हृद्गतं न भवति यत् तस्य वर्षैकस्य त्यागेन तद्वस्तुनिर्माणं भविष्यति यत् राष्ट्रस्य तत्समृद्धेश्च गौरवचिह्नरूपेण चिरं स्थास्यति।

अयमुपक्रमः अस्मत्पाठकानां सामान्यजनानां च अनुमोदनं प्राप्नुयात्, अपि च ते व्रतेऽस्मिन् अहमहमिकतया भागं गृह्णियुः चेत् वयं प्रसन्नाः सन्तुष्टाः भवेम। प्रबुद्धभारतनियोगः अप्यस्मिन् व्रतेऽङ्गभाक् भविष्यति। तथा च दानकर्तॄणामेका सूची सधनराशिः निर्मीय वर्षान्ते स्वामिनां स्मारकं प्रति तेषां प्रशंसनीयचेष्टां ज्ञापयन्ती प्रथिष्यते।

कार्यमिदं प्रति सम्पूर्णविश्वस्थानामस्मद्भ्रातृभगिनीनां च व्यवहारोचितसहयोगं प्रति अनन्तविश्वासेन सह

सदैव भगवत्सन्निधौ
स्वामिब्रह्मानन्दः
अध्यक्षः, रामकृष्णमिशन्
रामकृष्णमठः, बेलूडः, हाउडाजनपदः

# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

**[पूर्वाङ्कात् अनुवर्तते...]**

अनुवादकः– ब्रह्मचारी अच्युतचैतन्यः

क्रमेण साधनानिष्ठस्य राखालस्य एवम् अवस्था सञ्जाता यत् दैनन्दिनकार्येषु अपि तस्य मनोनिवेशः अशक्योऽभवत्। इदं परिलक्ष्य ठाकुरः अवदत्—"राखालस्य स्वभावः क्रमश एवं परिवर्तते यत्, मया तस्मै जलमपि दातव्यं भवति; सेवाकर्मणि अपि तस्य मनो न तिष्ठति"। तदा संसारं प्रति तस्य वैराग्यभावः एवम् अवर्धत यत्, राखालः प्रायशः ठाकुरं निवेदयति स्म—"संसारः मह्यं निःसारः प्रतिभाति—मध्ये मध्ये त्वमपि मह्यं न रोचसे"।

क्रमेण वर्षत्रयं व्यतीतम्। समयेऽस्मिन् राखालः भूयः ज्वरेण आक्रान्तो भवति स्म। तस्मात् अनिच्छुकेनापि तेन मध्ये मध्ये कलिकातां गत्वा तत्रैव वासः क्रियते स्म। किन्तु स पितृगृहम् अगत्वा बलराममन्दिरे अथवा अधरसेनमहाशयस्य गृहे निवसति स्म। समयेऽस्मिन् तस्य चित्तेऽपि आलोडनमेकं जायमानम् आसीत्। ठाकुरः अवदत्—"तदा बालकवद् राखालस्य मनसि ईर्ष्यापि आसीत्। अतः मम मनसि मध्ये मध्ये तस्य विषये भीतिः जायते स्म। यतो हि, माता (जगदम्बा) यान् अत्र आनयति, कदाचित् तेषु ईर्ष्याभावाश्रयणात् तस्य अकल्याणं स्यादि"ति। नवागताः ठाकुरस्य स्नेहभाजः स्युः—इत्येतद् राखालः कथमपि न सहते स्म। अस्यां परिस्थितौ, एकदा श्रीरामकृष्णः भावचक्षुषा अपश्यत् यत्, अम्बा राखालम् अपसारयति इव; तदा झटिति व्याकुलः सन् मातरं प्रार्थयन् आह—"अम्ब, हृदयवत् तमपि मा अपसारय; अम्ब, स

बालिशः, बोद्धुं न शक्नोति—अतः मध्ये मध्ये अभिमानं करोति। यदि तव कार्यार्थम् इतः तम् अपसारयसि, तर्हि रम्ये प्रदेशे स्थापय यथा स आनन्देन तिष्ठेत्।” यद्वा भवतु, राखालः कलिकातानगरे भक्तगृहे कानिचन दिनानि आनन्देनैव यापितवान्। परन्तु सर्वविधयत्नेनापि स्वास्थ्यम् उल्लाघं नाभवत्। तस्मिन् समये एव बलराममहाभागः वृन्दावनं गन्तुम् उद्युक्तः आसीत्। स राखालं वृन्दावनं नेतुकामः इति ज्ञात्वा ठाकुरः सहर्षं तद् अनुमोदितवान्। तदनुसारेण चतुरशीत्यधिक-अष्टादश-शततमवर्षस्य सेप्टेम्बर-मासस्य प्रारम्भे राखालः व्रजधाम्नि उपस्थितः। सौन्दर्यनिलये भावगम्भीरे च व्रजधाम्नि राखालः विशिष्टम् आनन्दम् अन्वभवत्। इदम् एव श्रीकृष्णस्य लीलाभूमिः वृन्दावनम्! इदमेव तद् यमुनापुलिनम्! अत्र प्रतिकुञ्जं मयूरा मयूर्यश्च नृत्यन्तः विचरन्ति। स्वभावसुन्दरे धाम्नि प्रारम्भे कतिचन दिवसानि राखालस्य मनः तथा शरीरमपि स्वस्थम् एव आसीत्। परन्तु केभ्यश्चित् दिनेभ्यः परं पुनः ज्वरः तं रुजति स्म। वार्तामिमाम् आकर्ण्य उद्विग्नः श्रीरामकृष्णः अवदत्—“राखालः प्रकृत्यैव व्रजगोपबालः। यः यस्मात् स्थानाद् अवतीर्य शरीरं गृह्णाति, तत्र गमनेन प्रायशः तस्य शरीरं नश्येत्।” अत आकुलो भूत्वा जगज्जनन्यै न्यवेदयत्—“मातः, अनेन को वा लाभः? कृपया तं स्वस्थीकुरु; स गृहादिकं सर्वस्वं परित्यज्य मामेव आश्रितवान् खलु!”


माता ठाकुरस्य प्रार्थनां श्रुतवती। मासत्रयात् परं नवम्बर-मासस्य अन्तिमभागे पूर्वापेक्षया उल्लाघतां समासाद्य राखालः वृन्दावनात् प्रत्यावर्त्य पुनः ठाकुरस्य सेवायां लग्नः अभवत्। किन्तु दैवक्रमेण मासेभ्यः परं स पुनः अस्वस्थः सञ्जातः। ठाकुरोऽपि तदा कफादिरोगैः पीडितः आसीत्। राखालः जानाति स्म यत्, ठाकुरः तस्य विषये सदा चिन्तितः भवति। अतो दुर्बलेन शरीरेण दक्षिणेश्वरे अवस्थीयते चेत् ठाकुरस्य उद्वेगवृद्धिः एव भविष्यति। तादृशी दुश्चिन्ता यथा मा भूत् तथा आचरणीयम्—इत्येवं विचिन्त्य स ठाकुरं मनोगतभावम् असूचयित्वा

एव पित्रालयं प्रतिनिवृत्तः, सम्पूर्णस्वास्थ्यलाभस्य आशया च तत्रैव अवस्थितिम् अकरोत्।

अस्माभिः पूर्वमेव उक्तं यत्, गृहं प्रतिगन्तुम् अनिच्छन्तमपि राखालं मध्ये मध्ये गृहं प्रेष्य ठाकुरः हृतशावका विहङ्गी इव कष्टेन व्याकुलीभवति स्म। प्रथमतो निषेधतः अपि राखालस्य गृहे गमनागमनं तथा तत्र अवस्थितिकालश्च क्रमेण अवर्धत, तदा विश्वेश्वर्या सह तस्य व्यवहारादिकमपि प्रायः स्वाभाविकमेव सञ्जातम्। ठाकुरः अवादीत्—“अहमेव तं तस्य परिवारस्य समीपे प्रेषयामि स्म—अल्पः भोगः अवशिष्टः आसीत् किल।” राखालस्य स्वाभाविकं व्यवहारादिकं दृष्ट्वा आत्मीयाः सर्वे आश्वस्ताः सन्तः तं कर्मसु प्रवर्तयितुम् अचेष्टन्त। राखालेन अस्यां वार्तायां निवेदितायां ठाकुरः उक्तवान्—“ईश्वरप्राप्तये गङ्गायां निमज्जनेन मरणं जातमित्यपि वरम्, परन्तु जीविकायै कस्यापि दासः अभवः, वृत्तिभोगी वा सञ्जातः—इति कदापि न शृणुयाम्।” परन्तु स्वजना अपि न त्यक्तवन्तः, ते विपरीतयुक्तिं प्रदर्शितवन्तः, स्वस्य कृते न क्रियते चेदपि परिजनानां कृते अर्थोपार्जनम् अपेक्षितम्, कारणं परिजनेषु उत्तरदायित्वं वर्तते खलु। ततः सारल्येन राखालः ठाकुरं पृष्टवान्—“मम भार्यायाः किं भविष्यति” इति। प्रश्ने पृष्टे सति ठाकुरं निरुत्तरम् अवेक्ष्य राखालः चिन्तान्वितः अभवत्। यद्वा भवतु, अगत्या स्वास्थ्यस्य उन्नत्यै अथवा दैवात् अवशिष्टस्य भोगस्य भुक्तये एव वा तदा सन्दिग्धमनाः राखालः गृहे एव निवसति स्म। अपरतः ठाकुरः प्रसङ्गक्रमेण अन्यान् भक्तान् उक्तवान्—“राखालः अवसरकालिकवृत्तिम् उपभुङ्क्ते—वृन्दावनतः प्रत्यागत्य इदानीं स्वगृहे तिष्ठति।” इत्थं राखालः स्वगृहे कानिचन दिनानि व्यतीत्य स्वास्थ्यलाभमात्रेणैव दक्षिणेश्वरं पुनरागतवान्।

अस्मिन् समये श्रीमान् महिमाचरणचक्रवर्तिमहाभागः न्यवेदयत् यत् ठाकुरस्य पुरतः ब्रह्मचक्रं विरचय्य साधनायाः अभिलाषः जातः इति। ततः ठाकुरस्य अनुमतिक्रमेण तस्यैव कक्षे कृष्णचतुर्दश्याः गभीररात्रौ राखाल-मास्टार-

किशोरी-प्रभृतीन् आदाय महिमाचरणमहाभागो ध्यानार्थम् उपाविशत्। ध्यानेन भावावस्थायाम् उपस्थितौ सत्यां ठाकुरः राखालस्य वक्षःस्थले हस्तसञ्चालनेन तस्य बाह्यप्रत्ययं प्रत्यानीतवान्। इतः दिवसद्वयात् परं ठाकुरः मौनी अभवत्, तदवस्थातः प्रत्यागत्य उक्तवान्—"अम्बा दर्शयन्ती आसीत्—भक्तेषु कस्य कियद् जातम्।" जिज्ञासिते सत्यपि सः अधिकं किमपि नावादीत्। परं शरत्-महाराजं प्रति ठाकुरः अवदत्—"राखालस्य विषये माता बहु किमपि अदर्शयत्। परन्तु तद्विषये अधिकम् आलोचनं निषिद्धं वर्तते।"



[बेलुडमठे स्वामिब्रह्मानन्दमन्दिरे गोपालविग्रहस्य चित्रम्]

# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

**[पूर्वाङ्कात् अनुवर्तते...]**

अनुवादकौ– डॉ. राकेशदाशः*, शान्तनुनायेकः†

## प्रथमः खण्डः– द्वितीयः अध्यायः (कामारपुकुरम् पितृपरिचयश्च)

### देरेग्रामस्य भूस्वामिनः रामानन्दरायस्य कथा

कामारपुकुरात् प्रतीच्यां प्रायः एकक्रोशाद् दूरं सातवेडे, नारायणपुरं, देरे इत्याख्याः त्रयः ग्रामाः सन्ति। एते ग्रामाः कदाचित् समृद्धाः आसन्। देरेग्रामस्य दीर्घिका, तत्पार्श्वस्थः देवालयः, अपि च तद्व्यतिरिक्तबहुविषयपर्यालोचनेन तद् अनुमीयते। अस्माभिः यस्य कालस्य विषये उच्यते तस्मिन् काले उक्ताः त्रयः ग्रामाः भिन्नानां भूस्वाम्यधिगता आसन्, अपि च तद्-भूस्वामी रामानन्दरायः सातवेडे इत्याख्ये ग्रामे निवसति स्म। अयं भूपतिः धनिकः नासीत् चेदपि प्रजापीडकः आसीत्। केनचित् कारणेन कस्यचिद् उपरि कुपितश्चेत् अयं तं जनं सर्वस्वान्तं कर्तुम् अनिच्छुकः न भवति स्म। अस्य पुत्रकन्यादिषु कोऽपि जीवितः नासीत्। जनैः कथ्यते यत् प्रजापीडनरूपापराधेनैव अयं निर्वंशः जातः, अपि च देहत्यागाद् अनन्तरम् अस्य विषयसम्पत्तिः अपरहस्तगता आसीत्।

* सहायकाध्यापकः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध-संस्थानस्य, बेलुडमठस्य।

† शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

सूचीपत्रं प्राप्तुं नुदतु

## देरेग्रामस्य मानिकराम-चट्टोपाध्यायः

प्रायः सार्धैकशतवर्षात् पूर्वं मध्यमवित्तशालिनः धर्मनिष्ठस्य कस्यचित् ब्राह्मणकुलस्य देरेग्रामे वासः आसीत्। एते सदाचारिणः, कुलीनाः श्रीरामचन्द्रस्य उपासकाश्च आसन्। एतैः प्रतिष्ठापिता शिवालयसमन्विता पुष्करिणी अधुनापि 'चाटुज्जे पुकुर' इति नाम्ना ख्यातः सन् एतेषां परिचयं प्रददाति। उक्तवंशीयस्य श्रीयुक्त-मानिकराम-चट्टोपाध्यायस्य त्रयः पुत्राः एका कन्या च आसीत्। तेषु ज्येष्ठः क्षुदिरामः प्रायः ११८१ वङ्गाब्दे जन्म प्रापत्। ततः रामशीलाख्यायाः एकस्याः कन्यायाः अपि च निधिराम-कानाइरामेत्याख्ययोः द्वयोः पुत्रयोः जन्म अभवत्।

## तत्पुत्रस्य क्षुदिराम-चट्टोपाध्यायस्य कथा

श्रीयुक्तः क्षुदिरामः वयःप्राप्त्या सह कस्याञ्चिद् अर्थकर्यां विद्यायां योग्यताम् अर्जितवान् वा इति विषये तु न ज्ञायते। परन्तु सत्यनिष्ठा, सन्तोषः, क्षमा, त्यागः इत्यादयः गुणाः सद्ब्राह्मणस्य स्वभावसिद्धकर्तव्यतया शास्त्रनिर्दिष्टाः सन्ति, विधाता तस्मै एतान् गुणान् आधिक्येन प्रादात्। सः दीर्घकायः सबलश्चासीत्, परन्तु स्थूलकायः नासीत्, गौरवर्णयुक्तः प्रियदर्शनश्चासीत्। वंशानुगते श्रीरामचन्द्रे भक्तिः तस्मिन् क्षुदिरामे विशेषरूपेण प्रकाशते स्म, अपि च सः नित्यकृत्यानि सन्ध्यावन्दनादीनि समाप्य प्रतिदिनं पुष्पचयनपूर्वकं रघुवीरस्य पूजां समाप्यैव जलं पिबति स्म। शूद्रात् दानं न स्वीकरोति स्म, शूद्रयाजिनः ब्राह्मणस्य आमन्त्रणमपि कदापि न गृह्णाति स्म, अपि च ये ब्राह्मणाः यौतुकं स्वीकृत्य कन्यां सम्प्रददति स्म, तेषां हस्तात् कदापि जलग्रहणमपि न करोति स्म। एतादृश्याः निष्ठायाः, सदाचारस्य च हेतोः ग्रामीणाः तस्मिन् भक्तिं, सम्माननं च कुर्वन्ति स्म।

## क्षुदिराम-गृहिणी श्रीमतीचन्द्रादेवी

पितुः परलोकप्रयाणाद् अनन्तरं संसारस्य विषयसम्पत्तेश्च पर्यवेक्षणदायित्वं श्रीयुक्तक्षुदिरामस्य उपरि एव आपतितम्, अपि च धर्मीयमार्गेण अविचलितः सन् सः तादृशं सर्वं कार्यं यथाशक्ति सम्पादयति स्म। एतावता विवाहं कृत्वा सः संसारे प्रविष्टश्चेदपि तस्य स्त्री अल्पीयसि आयुषि दिवम् अगात् । अतः प्रायः पञ्चविंशतिवर्षे वयसि सः पुनः विवाहं चकार। एतस्याः भार्यायाः नाम आसीत् चन्द्रादेवी इति। परन्तु गृहे सर्वे एतां चन्द्रा इति नाम्ना सम्बोधयन्ति स्म। श्रीमत्याः चन्द्रादेव्याः पित्रालयः सराटिमायापुरम् इत्याख्ये ग्रामे अवर्तत। सा सुरूपा, सरला देवद्विजपरायणा चासीत्। परन्तु असीमश्रद्धा, स्नेहः प्रीतिश्च तस्याः विशेषगुणत्वेन गणयितुं शक्यन्ते, एतस्मादेव कारणाच्च सा गृहे सर्वेषां प्रियतमा अभवत्। प्रायः ११९७ वङ्गाब्दे श्रीमती चन्द्रमणिः जनिं लेभे। अतः १२०५ वङ्गाब्दे विवाहकाले तस्याः वयः अष्टवर्षाणि। प्रायः १२११ वङ्गाब्दे तस्याः प्रथमपुत्रः रामकुमारः जन्म प्रापत्। ततः प्रायः पञ्चवर्षात् परं श्रीमती कात्यायनी इत्याख्यायाः कन्यायाः, अपि च १२३२ वङ्गाब्दे द्वितीयपुत्रस्य रामेश्वरस्य मुखावलोकनेन सा आनन्दिता अभवत्।

## भूस्वामिना सह कलहेन क्षुदिरामस्य निःस्वत्वम्

धर्ममार्गम् अवलम्बयन् संसारस्य निर्वहनम् अत्यन्तं क्लिष्टं कर्म, इत्येतस्य विषयस्य अवगमे श्रीयुक्तस्य क्षुदिरामस्य विलम्बः न जातः। प्रायः कन्यायाः कात्यायन्याः जन्मग्रहणात् किञ्चित् परं सः विषमपरीक्षायां निपतितः आसीत्। ग्रामस्य भूस्वामिनः रामानन्दरायस्य प्रजापीडनकथा अस्माभिः पूर्वम् आलोचिता। देरेपुरस्य कस्मिंश्चित् जने असन्तुष्टः सन् मिथ्यापरिवादेन न्यायालये अभियोगम् अकरोत्, अपि च विश्वस्तस्य साक्षिणः प्रयोजनम् अस्ति इति विचिन्तयन् श्रीयुक्तं क्षुदिरामं तत्पक्षे साक्ष्यप्रदानाय अन्वरुद्ध। धर्मपरायणः

क्षुदिरामः सर्वदैव नियम-न्यायालयात् बिभेति स्म, अपि च वृत्तान्तः यथार्थः चेदपि पूर्वं कदापि कस्यचिदपि विरोधाय तेषाम् आश्रयं न स्वीकृतवान्। अतः भूस्वामिनः पूर्वोक्तानुरोधेन स्वं विशेषविपन्नम् अचिन्तयत्। परन्तु मिथ्यासाक्ष्यं न प्रदीयते चेत् भूस्वामिनः विषमकोपे पतितः स्यात् इति ज्ञात्वापि सः साक्ष्यप्रदानाय सम्मतिं न प्रादात्। अतः अत्र यद् भवेत् तदेव अभवत्। भूस्वामी तम् अपि विरुध्य मिथ्यापरिवादपूर्वकम् अभियोगम् उपन्यभान्त्सीत्, अभियोगे च जयं प्राप्य क्षुदिरामस्य पैतृकसम्पत्तिं प्रतिक्रोशेन (auction) क्रीतवान्। श्रीयुक्तक्षुदिरामस्य देरेपुरे किञ्चिदपि निवासस्थानं नासीत्। सर्वे ग्रामस्थाः तद्दुःखे दुःखिताश्चेदपि भूस्वामिनः प्रतिकूले तस्मै किञ्चिदपि साहाय्यं कर्तुम् असमर्थाः। एवंरूपेण प्रायः चत्वारिंशत्तमे वयसि श्रीयुक्तक्षुदिरामः निःस्वः जातः।

## क्षुदिरामस्य देरे-ग्रामपरित्यागः

पितृपुरुषाणां दायादरूपेण स्वीयोपार्जनेन च सः यां सम्पत्तिं[१] वर्धितवान्, वायुप्रवाहितछिन्नाभ्र इव सा इदानीं विलुप्ता। परन्तु एतादृशनिदर्शनेन सः धर्ममार्गात् विचलितः नाभूत्। सः रघुवीरस्य श्रीपादपद्मस्य शरणं गृहीतवान्, अपि च स्थिरचित्तः सन् स्वीयकर्तव्यम् अवधारणपूर्वकं दुर्जनं परिहर्तुं पैतृकगृहात् ग्रामात् च अनन्तकालाय बहिर्गतवान्।

## सुखलालगोस्वामिनः आमन्त्रणेन क्षुदिरामस्य कामारपुकुरागमनं वासश्च

कामारपुकुरस्य श्रीयुक्तसुखलालगोस्वामिनः कथा अस्माभिः पूर्वम् उल्लिखिता। समस्वभावविशिष्टत्वात् श्रीयुक्तक्षुदिरामेण सह पूर्वस्मादेव विशेषसौहार्द्यम् आसीत्। मित्रस्य ईदृशीं विपदं विज्ञाय सः विशेषतः उद्विग्नः

[१] हृदयराम-मुखोपाध्यायात् श्रुतवान्, देरेपुरे श्रीयुक्तक्षुदिरामस्य प्रायः सार्धशतबिघामिता भूमिः आसीत्।

अभवत्, अपि च स्वगृहस्य एकस्मिन् पार्श्वे कांश्चन उटजान् अनन्तकालाय त्यक्त्वा कामारपुकुरम् आगम्य उषितुम् अनुरुरोध। श्रीयुक्तक्षुदिरामः तेन अकूले कूलं प्राप्तवान्, अपि च श्रीभगवतः अचिन्त्यलीलयैव पूर्वोक्तः अनुरोधः उपस्थितः इति विचिन्त्य कृतज्ञहृदयः सः कामापुकुरम् आगम्य तदारभ्य तत्रैव ऊषितवान्। बन्धुप्राणः सुखलालः तेन विशेषरूपेण आनन्दितः अभूत्, अपि च धर्मपरायणस्य क्षुदिरामस्य संसारनिर्वहणाय किञ्चित् कृषिक्षेत्रं तस्मै अनन्तकालाय प्रादात्।

